॥ अथ सटीकविष्णुसहस्रनामप्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ स्वयंप्रकाशतीर्थांघ्रिलब्धवेदांतितत्पदः महादेवोथव्याचष्टेविष्णोर्नामसहस्रकं ॥ १ ॥ आचार्याद्यपिव्याख्यांचक्रुर्नामसहस्रके
कायवाक्स्वांतसंशुध्यैपुनःकुर्वेतथाप्यहं ॥ २ ॥ मेरौचपरमाणौचपदार्थत्वंयथासमं व्याख्यातृत्वंतथाश्रीमदाचार्येषुचमय्यपि ॥ ३ ॥ क्वभारतंक्वतद्व्या
ख्याक्वाहंकिंतुगुरोःकृपा मूकंकरोतिवाचालंपंगुंलंघयतेगिरिं ॥ ४ ॥ स्त्रीशूद्रद्विजबंधूनांत्रयीनश्रुतिगोचरा इतिभारतमाख्यानंकृपयामुनिनाकृतं ॥ ५॥
इत्युक्त्यासर्ववर्णानांश्रोतव्योयंस्तवोभवेत् तदर्थश्चततोव्याख्याममसर्वोपकारिणी ॥ ६ ॥ भाष्यबोधासमर्थानांजनानांहितकार्ययं नोपेक्ष्यःकिंतुसत्का
र्योयंथोपिलघुनाकृतः ॥ ७ ॥ खलैस्तुखलताकार्यानहानिस्तावतास्तिमे कस्तूरीपामरैस्त्यक्तास्वंमहत्त्वंकिमुज्झति ॥ ८ ॥ अनेकविधधर्माणांश्रवणे
पिनतृप्तिभाक् युधिष्ठिरःशांतनवंयत्पप्रच्छात्मतुष्टये ॥ ९ ॥ यच्चभीष्मःपरोभक्तस्तत्रप्रत्युत्तरंददौ तत्सर्वंसौतिराचष्टेशौनकादीनृषीन्प्रति ॥ १० ॥
वैशंपायनइत्यादि अत्रवैशंपायनोजनमेजयमुवाचेतिप्रकरणाल्लभ्यते जनमेजयस्यैववैशंपायनंप्रतिप्रष्टृत्वावगमात् एतेनोवाचेतिसामान्यशब्दस्यल
क्षणयाजनमेजयोद्देश्यकवाक्योच्चारणरूपविशेषपरत्वंनतुजनमेजयमित्यस्याध्याहारः स्थितस्यैवपदस्यवृत्त्यंतरमात्रकल्पनेलाघवात् वृत्त्यंतरस्यपदां
तरस्यचकल्पनेगौरवादितिकेनचिदुक्तंपरास्तं किंच नसामान्यशब्दस्यविशेषपरत्वमात्रेलक्षणाकिंतुविशेषरूपेणबोधकत्वे यथाहुः शक्यादन्येनरूपे
णज्ञानेभवतिलक्षणेति शक्यात्शक्यतावच्छेदकरूपात् शक्यतावच्छेदकातिरिक्तरूपेणबोधेलक्षणेतिनिष्कर्षः • नहिघटमानयेत्यत्रघटपदस्यघटत्वरूपे
णैवपीतघटादिपरत्वेलक्षणाकिंतुपीतघटत्वादिरूपेणबोधकत्वेइत्यादिक्षुण्णमेवेत्यलमप्रस्तुतप्रसंगेन अत्र शंपांशतन्हदामाहुरयनंपतनंततः विगतंशब्दतो
यस्मात्तद्वैशंपायनःस्मृतइतिपौराणिकनिर्वचनवतावैशंपायनशब्देनमुनेर्महाप्रभावत्वावगमात्जनंदुष्टमेजयतिकंपयतिइतिव्युत्पत्त्यनुसृतेर्दुष्टनियाहकत्वा
दिमहाप्रभावत्वस्यजनमेजयेप्यवगमाच्चप्रष्टृप्रत्युत्तरदातृत्वयोग्यतासूच्यते ततःतस्याः शब्दतोहुंकारादितः आदिवृद्धिस्तुस्वार्थिकाण्प्रत्ययांतत्वात्

श्रुत्वेति अशेषेणसामस्त्येनउपलक्षितान् समस्तानितियावत् धर्मान्स्वर्गादिफलकानिकर्माणि पावनानिप्रायश्चित्तरूपाणि पापक्षयकराणिच सर्वशः सर्वप्रकारैःश्रुत्वाऽप्यपरितृप्यन् युधिष्ठिरःयुधिसंग्रामेस्थिरइतिव्युत्पत्त्यास्वकार्येस्थिरोनतुचंचलइत्यवगमेनतंप्रत्युत्तरदानमतियोग्यमितिसूच्यते संज्ञा त्वाच्चसप्तम्याअलुक् गवियुधिभ्यांस्थिरइतिषत्वं शांतनवंशांतनोःपुत्रंभीष्मं अनेनतत्रतत्रप्रसिद्धःपितृभक्त्यतिशयःसूच्यते पुनरेवपूर्वश्रुतधर्माद्यपेक्षयाविशिष्टमेव पुनरप्रथमेभेदेइत्यमरकोशेभेदशब्दस्यविशेषपरतयैवव्याख्यातृभिर्व्याख्यातत्वात् अभिसंमुखं अनेनशिष्यरीतिःसूच्यते अभाषतपृष्टवान् ॥ १ ॥ युधिष्ठिरउवाचेतिपुनरुक्तिस्तुपुराणेतिहासरीतिमनुसृत्यउवाचेत्यस्यैवंपृष्टवानित्यर्थः किमेकमित्यादि अत्रषट्प्रश्नाः लोकेलोकनहेतु

वैशंपायनउवाच श्रुत्वाधर्मानशेषेणपावनानिचसर्वशः ॥ युधिष्ठिरःशांतनवंपुनरेवाभ्यभाषत ॥ १ ॥

युधिष्ठिरउवाच किमेकंदैवतंलोकेकिंवाप्येकंपरायणं ॥ कंस्तुवंतःकमर्चंतःप्राप्नुयुर्मानवाःशुभं ॥ २ ॥

भूतसमस्तविद्यास्थानेएकंमुख्यं एकेमुख्यान्यकेवलाइत्यमरः दैवतंउपास्यंकिं मुख्यत्वंचसर्वाराध्यत्वसुखाराध्यत्वविशिष्टफलदातृत्वादिभिः द्वितीयप्रश्नमाह किंवेति वाशब्दःप्रश्नसमुच्चये परायणंईयतेप्राप्यतेइत्ययनं बाहुलकात्कर्मणिल्युट् परमुत्कृष्टंप्राप्यंएकंमुख्यंकिं ऐहिकफलाद्धिआमुष्मिकफलंबह्वानंदत्वबहुलकालस्थायित्वादिनापरं तत्रापिमुख्यत्वंस्वप्रकाशनित्यानंदरूपत्वेन तृतीयचतुर्थप्रश्नावाह कंस्तुवंतइति मानवाइत्यधिकार्युपलक्षणं मनुष्याधिकारंहिशास्त्रमितिमानवाइत्युक्तं कस्यस्तुत्याहेतुभूतयाऽधिकारिणःशुभमैहिकमामुष्मिकंचप्राप्नुयुः एवंकस्यार्चनेनहेतुभूतेनेतिचतुर्थःप्रश्नः स्तुवंतःअर्चंतइत्युभयत्रापिलक्षणहेत्वोःक्रियायाइतिसूत्रोक्तहेतुत्वबोधकस्यशतृप्रत्ययस्यदर्शनात् ॥ २ ॥

पंचमप्रश्नमाह कोधर्मइतिस्पष्टोर्थः परमत्वंहिंसारहितत्वमुमुक्षुवकिंचनसेव्यत्वादिना षष्ठंप्रश्नमाह किंजपन्निति किंजपन्जपपरिपाटीशाल्यनुसंधे यशब्दप्रतिपाद्यतादृशगुणाश्रयतयानुसंदधानः जंतुःजीवोधिकारी जंतुशब्देनजीवमात्रवाचिनानयज्ञादाविवधनवतोबलवतोविद्यावतएवाधिकारोऽपि त्वतादृशस्यापिजपेसइतिसूच्यते अत्रापिशतृप्रत्ययोहेतौ किंसंबंधिगुणप्रतिपादकशब्दानुसंधानरूपजपेनहेतुभूतेन जन्मसंसारबंधनात् जन्मपदंमृत्यो रप्युपलक्षकं यद्वासंसरतिपुनरुत्पद्यतेऽनेन जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यचेत्युक्तरीत्यासंसारोमृत्युः अस्मिन्पक्षेनबंधनपदस्यपौनरुक्त्यशंकापि जन्ममृत्यूएवबंधनमात्मनःसच्चिदानंदताविरोधि ततोमुच्यतेमुक्तिंप्राप्नोतीतियावत् जन्मपदस्यमृत्यूपलक्षकत्वेतुजन्ममृत्यूएवसंसारस्तस्यहेयत्वार्थंबंधन

कोधर्मःसर्वधर्माणांभवतःपरमोमतः॥ किंजपन्मुच्यतेजंतुर्जन्मसंसारबंधनात्॥ ३॥

भीष्मउवाच जगत्प्रभुंदेवदेवमनंतंपुरुषोत्तमं॥ स्तुवन्नामसहस्रेणपुरुषःसततोत्थितः॥ ४॥

रूपत्वमुक्तमितिबोद्धव्यं॥ ३॥ भीष्मउवाचेति अत्रविदित्वाभक्तियोगंतुभीष्मस्यपुरुषर्षभः सहसोत्थायसंहृष्टोयानमेवान्वपद्यतेतिराजधर्मोक्तिःश्रीकृष्णा कर्षणपर्यंतक्षमत्वशालीभक्तियोगोभीष्मपदेनसूच्यते जगत्प्रभुमिति यद्यपिप्रश्नक्रमेणोत्तरमुचितंतथापिउपस्थितत्वात्षष्ठप्रश्नस्यैवादावुत्तरमुच्यते ज गतांसर्वेषांप्रभुमीश्वरं देवानांलोकोत्तरतत्तत्क्रीडाशालिनामिंद्रादीनामपिदेवंपूज्यं यद्वादिवुधातोःस्तुत्यर्थाद्देवशब्दोत्पत्तेर्दीव्यंतिस्तुवंतीतिदेवास्तेषांदेवंस्तो तारं वंदितोहिसवंदतमानितोमानयीतचेतिराजधर्मोक्तेः येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहमितिभगवद्गीतोक्तेश्च अनंतंनाशरहितं पुरुषोत्तमंपूरयतिभ क्तानांकामान्सीदतिअवसादयतिचभक्तविरोधिनइतिपुरुषः पूरणात्सदनाच्चैवततोसौपुरुषोमतइत्युद्योगपर्वणिसंजयोक्तेः सचासावुत्तमश्चतं यस्मात्क्षरम

तीतोहमक्षरादपिचोत्तमः अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमइतिभगवद्गीतोक्तंवा पुरुषोधिकारी सततोत्थितोनिरंतरमुद्युक्तःसन्नामसहस्रेणस्तुवन् पुरु
षोत्तमीयतत्तद्गुणज्ञापकनामसहस्ररूपशब्दानुसंधानंकुर्वन्सर्वदुःखातिगोभवेदित्यन्वयः गुणज्ञापकशब्दानुसंधानमात्ररूपएवहिजपोनतुतादृशशब्दसंकी
र्त्तनपर्यंतस्तस्योच्चोपांशुमानसेतित्रैविध्यासंभवात् अत्रनामसहस्रेणेत्युक्तेरनादिनिधनमित्यत्रानुक्तेश्चैतस्यषष्ठप्रश्नोत्तरता अनादिनिधनमित्यस्यचतृती
यप्रश्नोत्तरताबोध्या अवश्यंहिकिंजपन्नित्यस्योत्तरेणात्रभाव्यं नचोत्तरेजपशब्दोस्ति अतउपस्थितिविशेषाच्चैतस्यैवषष्ठप्रश्नोत्तरतायुक्ततरा नचैवंपुरा
णाद्युक्तःसर्वोपिस्तवोजपःस्यादितिशंक्यं शास्त्रोक्तजपपरिपाटीशालिनःशब्दानुसंधानस्यजपत्वात् अतादृशस्यस्तवरूपत्वात् किंच शब्दप्राधान्येजपो
र्थप्राधान्येस्तवइतिमहान्भेदः अत्रानेकवित्तव्ययायाससाध्यराजसूयाश्वमेधादिभिरलभ्यस्यमोक्षस्यकथमुक्तशब्दानुसंधानमात्ररूपेणनामसहस्रजपे
नलाभइत्याशंकायांजगत्प्रभुमित्यादिनाविषयविशेषउक्तोभगवद्रूपः तथाचविषयमाहात्म्यादल्पायाससाध्येनापिकर्मणाफलविशेषलाभउचितएवेत्यु
क्तं अतएवस्कांदेनारदंप्रतिब्रह्मवाक्यं श्लोकेनैकेनदेवर्षेनामसाहस्रकस्ययत् पठितेनफलंप्रोक्तंनतत्क्रतुशतैरपि तत्रैवश्रीकृष्णार्जुनसंवादे स्तवंनामस
हस्राख्यंयेनजानंतिवैकलौ भ्रमंतितेनरालोकेसर्वधर्मबहिष्कृताः मुक्त्वानामसहस्रंतुनान्योधर्मोस्तिकश्चन कलौप्राप्तेगुडाकेशसत्यमेतन्मयोदितं यज्ञैर्दा
नैस्तपोभिश्चस्तवैःप्रीतिर्नमेर्जुन संतुष्टिस्तुनचान्येनविनानामसहस्रकं किंच यस्यैकैकनामव्याहारोपिसकृदपियेनकेनचिद्यादृशेनतादृशेनयस्यांक
स्यांचिदवस्थायांयत्रक्वचिद्यदाकदाचिद्यथाकथंचित्कृतोऽप्युत्कृष्टंफलंददातिकिमुततस्यनामसहस्रजपइति तथाचपुराणेषु सकृदुच्चरितंयेनहरिरित्यक्ष
रद्वयं बद्धःपरिकरस्तेनमोक्षायगमनंप्रति श्वादःपुल्कसकोवापिमुच्येरन्यस्यकीर्त्तनात् ब्राह्मणाःक्षत्रियावैश्याःस्त्रियःशूद्रांत्यजादयः यत्रतत्रानुकुर्वंतो
विष्णोर्नामानुकीर्त्तनं सर्वपापविनिर्मुक्तास्तेपियांतिसनातनं अयंहिकृतनिर्वेशोजन्मकोट्यंहसामपि यद्व्याजहारविवशोनामस्वस्त्ययनंहरेः अयंअजा

मिलः स्तेनःसुरापोमित्रध्रुग्ब्रह्महागुरुतल्पगः स्त्रीराजपितृगोहंतायेचपातकिनोपरे सर्वेषामप्यघवतामिदमेवसुनिष्कृतं नामव्याहरणंविष्णोर्यतस्त द्विषयामतिः विष्णुधर्मे चक्रायुधस्यनामानिसदासर्वत्रकीर्त्तयेत् नाशौचंकीर्त्तनेतस्यसपवित्रकरोयतः स्कांदे नदेशकालावस्थात्मशुध्यादिकमपेक्षते किंतुस्वतंत्रमेवैतन्नामकामितकामदं नदेशनियमस्तस्मिन्नकालनियमस्तथा नोच्छिष्टादौनिषेधश्चश्रीहरेर्नाम्निलुब्धक विष्णुधर्मोत्तरे नामानिसर्वाणि जनार्दनस्यकालश्चसर्वःपुरुषप्रवीरः तस्मात्सदासर्वगतस्यनामग्राह्यंयथेष्टंवरदस्यराजन् श्रीभागवतेप्रथमस्कंधे तद्वाग्विसर्गोजनताघविप्लवोयस्मिन्प्रति श्लोकमबद्धवत्यपि नामान्यनंतस्ययशोंकितानियच्छृण्वंतिगायंतिगृणंतिसाधवः अन्यान्यपिनाममाहात्म्यप्रतिपादकानिवाक्यानिसहस्रशःसंति तत्र कानिचिल्लिख्यंते ब्रह्मपुराणे अनन्यचित्तःशुद्धोवायःसदाकीर्त्तयेद्धरिं सोपिदोषक्षयान्मुक्तिंलभेच्चेदिपतिर्यथा पद्मपुराणे संसारसर्पसंदष्टनष्टचेष्टैकभे

तमेवचार्चयन्नित्यंभक्त्यापुरुषमव्ययं॥ ध्यायन्स्तुवन्नमस्यंश्चयजमानस्तमेवच ॥५॥

षजं कृष्णेतिवैष्णवंमंत्रंश्रुत्वामुक्तोभवेन्नरः यत्रतत्रस्थितोवापिकृष्णकृष्णेतिकीर्त्तनात् सर्वपापविशुद्धात्मासगच्छेत्परमांगतिं सर्वधर्मोज्झिताविष्णोर्नाम मात्रैकजल्पकाः सुखेनयांगतिंयांतिनतांसर्वेपिधार्मिकाः ॥ ४ ॥ अथकमर्चंतइतिचतुर्थप्रश्नस्योत्तरमाह तमेवेति तमेवपूर्वोक्तंपुरुषंपूर्णंभक्त्यासापरानु रक्तिरीश्वरइत्युक्तलक्षणयाअर्चयन् बाह्यार्चनेनपूजयन् ध्यायन्आभ्यंतरार्चनेनपूजयन् अव्ययंविनाशरहितमितितत्पदार्थस्यैवविशेषणं अर्चनक्रि यावान् अर्थस्यापगमोव्ययइत्यमरोक्तेरव्ययंव्ययरहितमप्यर्चयन्फलभागितिव्याख्येयं जलेनापिजगन्नाथःपूजितःक्लेशहाहरिः परितोषंव्रजत्याशु तृषार्त्तःसलिलैर्यथेतिनारदीयोक्तेः स्तुवन्नमस्यन्नितिपूजांगभूतस्तुतिनमस्कारौकुर्वन् पुनस्तमेवेत्युक्त्याअंगभूतावपिस्तुतिनमस्कारौनान्यविषयावि तिकथयति स्तवैरुच्चावचैःस्तोत्रैःपौराणैःप्राकृतैरपि स्तुत्वाप्रसीदभगवन्नितिवंदेतदंडवत् इत्यर्चनांगभूतस्तुतिनमस्कारयोरेकादशेउक्तेः नित्यमित्यपिक्रि

याविशेषणमेव कृष्णंकमलपत्राक्षंनार्चयिष्यंतियेनराः जीवन्मृतास्तुतेज्ञेयानसंभाष्याःकदाचनेतिसभापर्वणिनारदोक्तेः ईदृशोयजमानःपूजकःसर्वदुःखातिगोभवेदितिसंबंधः ॥ ५ ॥ तृतीयप्रश्नोत्तरमाह अनादीति जन्ममरणाभ्यांषडपिभावविकारानुपलक्षयति तथाचजायतेअस्तिवर्द्धतेविपरिणमते अपक्षीयतेनश्यतीतिषड्विकाररहितं विष्णुंव्यापनशीलं सर्वलोकानांमहेश्वरंब्रह्मादिभ्योप्यधिकं लोकंदृश्यवर्गंस्वरूपबोधेनाध्यक्षयतिप्रत्यक्षीकरोतीति लोकाध्यक्षस्तंस्तुवन्नित्यंनिरंतरंसर्वदुःखानिआध्यात्मिकादीनिअतीत्यगच्छतीतिसर्वदुःखातिगोभवेदितिजपार्चनस्तवनानांसाधारणंफलवचनं ॥ ६ ॥

अनादिनिधनंविष्णुंसर्वलोकमहेश्वरं॥ लोकाध्यक्षंस्तुवन्नित्यंसर्वदुःखातिगोभवेत् ॥ ६ ॥
ब्रह्मण्यंसर्वधर्मज्ञंलोकानांकीर्त्तिवर्द्धनं ॥ लोकनाथंमहद्भूतंसर्वभूतभवोद्भवं॥ ७ ॥
एषमेसर्वधर्माणांधर्मोधिकतमोमतः॥ यद्भक्त्यापुंडरीकाक्षंस्तवैरर्चेन्नरःसदा॥ ८॥

स्तुत्यंविशिनष्टि ब्रह्मण्यमिति ब्रह्मणेवेदायतपसेचतुर्मुखायचहितंब्रह्मण्यं सर्वेषांसाधारणंधर्मंसर्वान्धर्मान्वाजानातीतिसर्वधर्मज्ञस्तं लोकानांभक्तजनानांप्रह्लादादीनांकीर्त्तिवर्द्धयतीतिकीर्तिवर्द्धनस्तं लोकैर्नाथ्यतेयाच्यतेइतिलोकनाथस्तं महद्व्यापकंभूतंपरमार्थसत्यं सर्वेषांभूतानांभवस्यसंसारस्यउद्भवंहेतुभूतं ॥ ७ ॥ पंचमप्रश्नस्योत्तरमाह एषमइति स्तवैर्गुणसंकीर्त्तनलक्षणैरर्चेत् यत्एषसर्वधर्माणामधिकतमोधर्मइतिसंबंधः जपेनैवतुसंसिध्येद्ब्राह्मणोनात्रसंशयः कुर्यादन्यन्नवाकुर्यान्मैत्रोब्राह्मणउच्यते इतिमनुवचनं जपस्तुसर्वधर्मेभ्यःपरमोधर्मउच्यते अहिंसयाचभूतानांजपयज्ञःप्रवर्त्ततेइतिव्यासवचनंच पुरुषांतरद्रव्यदेशकालनियमानपेक्षत्वंचाधिक्येकारणं ॥ ८ ॥

द्वितीयप्रश्नस्योत्तरमाह परममिति यःपरमंतेजःयःपरमंतपइत्यादितस्यविष्णोर्नामसहस्रंमेशृण्वितिसंबंधः परमंप्रकृष्टंमहद्बृहत्तेजश्चैतन्यलक्षणंसर्वाव भासकं तपइतिईशितृइत्यर्थः तपऐश्वर्येइतिधात्वनुसारात् अनवच्छिन्नैश्वर्यइत्यर्थ परमंसत्यादिलक्षणंमहत्महनीयंब्रह्म परमंप्रकृष्टंपरायणंपुनरावृत्ति शंकारहितं एतदनुवादबलेनैवकिंवाप्येकंपरायणमितिद्वितीयप्रश्नस्योत्तरमुक्तंभवति ॥ ९ ॥ प्रथमप्रश्नस्योत्तरमाह पवित्राणामिति अत्राप्यनुवादबले नकिमेकंदैवतमितिप्रश्नस्योत्तरमुक्तं भूतानांअव्ययोविनाशरहितःपितेतिप्रसिद्धपितृवैलक्षण्यमुक्तं ॥ १० ॥ यतःसर्वाणिभूतानिभवंति यस्मिंश्चप्रल

परमंयोमहत्तेजःपरमंयोमहत्तपः ॥ परमंयोमहद्ब्रह्मपरमंयःपरायणं ॥ ९ ॥ पवित्राणांपवित्रंयोमंगलानांचमंग लं ॥ दैवतंदेवतानांचभूतानांयोऽव्ययःपिता ॥ १० ॥ यतःसर्वाणिभूतानिभवंत्यादियुगागमे ॥ यस्मिंश्चप्रलयंयां तिपुनरेवयुगक्षये ॥ ११ ॥ तस्यलोकप्रधानस्यजगन्नाथस्यभूपते ॥ विष्णोर्नामसहस्रंमेशृणुपापभयापहं ॥ १२ ॥

यंयांतीतिजन्मप्रलययोरुक्त्यातन्मध्येस्थितिरप्युपलक्ष्यते ब्रह्मलक्षकयतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतीत्यादिश्रुत्य नुसारात् ॥ ११ ॥ मेमत्तः पापभयापहमिति उक्तंचस्कांदे कुर्वन्पापसहस्राणिभुंजानोपियतस्ततः पठन्नामसहस्रंतुदुर्गतिंनसपश्यति उत्थायकाले योनित्यंशुचिस्तद्गतमानसः नाम्नांसहस्रंचाधीतेमुक्तिस्तस्यकरेस्थितेति ननुनामसहस्रमितिकथं विष्ण्वादिनाम्नामावृत्तत्वात् संख्यायाश्चपृथक्त्वनिवे शित्वादितिचेन्न अर्थभेदाच्छब्दभेदइत्याश्रयणेनदोषाभावाद्दर्शयिष्यतेचार्थभेदस्तत्रतत्र ॥ १२ ॥

नामसहस्रमित्युक्तनाम्नांविशेषमाह यानीति गुणशब्दोजन्मकर्मणोरप्युपलक्षणं तथाचगुणजन्मकर्मनिमित्तानीतिलभ्यते किंचगौणानिगौण्यावृत्त्या प्रयुक्तानिच एतच्चस्फुटीभविष्यतितत्रतत्र तादृशान्यपिसहस्राधिकानीत्यतआह विख्यातानिविशेषेणप्रसिद्धानि तादृशान्यपिसहस्राधिकानीत्यतआह ऋषिभिर्मंत्रैःमंत्रदृग्भिर्वापरिगीतानीति भूतयेपुरुषार्थचतुष्टयलाभाय ॥ १३ ॥ अथभाष्यानुसारेणनामार्थःस्पष्टमुच्यते प्रकृतिप्रत्ययाद्युत्त्यानाम्नां रूपंविविच्यते विशतिस्वकारणमितिविश्वं तस्यचकारणाभिन्नत्वात्कारणमपिविश्वशब्देनोच्यते यद्यप्यस्यकृत्स्नवाचित्वेसर्वनामकार्यापत्तिश्चतुर्थ्यंतादौतथापियानिनामानीत्युक्त्यानामत्वान्नदोषः अतएवविश्वेश्वरायविश्वायगोविंदायनमोनमइतिगोपालतापिन्यां यदितुतत्सृष्ट्वातदेवानुप्राविशदितिश्रु

यानिनामानिगौणानिविख्यातानिमहात्मनः॥ ऋषिभिःपरिगीतानितानिवक्ष्यामिभूतये॥ १३॥

ॐविश्वंविष्णुर्वषट्कारोभूतभव्यभवत्प्रभुः॥ भूतकृद्भूतभृद्भावोभूतात्माभूतभावनः॥ १४॥

त्यनुसारित्वेनानुगच्छतीतिव्याख्यायतेतदानसर्वनामत्वशंकापि यत्प्रयंत्यभिसंविशंतीतिश्रुत्यनुसाराद्विशतियद्यस्मिन्वाजगत्संहारकालइतिविश्वमिति व्याख्यानेतुकर्मादौप्रत्ययःक्लिष्टः बाहुलकात्तुलभ्येत सचानन्यगतिकत्वेश्रुतिपुराणादौतादृङ्निर्वचनेवासतियुक्तइतिसुधीभिराकलनीयं विशप्रवेशने इत्यस्मात् आशूप्रुषिलटिकणिखटिविशिभ्यःक्वन्नितिकर्त्तरिक्वन् कार्यपरत्वेनपुंसकत्वंसंगतमेव कारणपरत्वेतुकिमेकंदैवतमित्यभिहितंदैवतंविशेष्यमादायसंगमनीयं सर्वाणिचनामानियौगिकानिगुणवृत्तीनिवा यानिनामानिगौणानीत्युक्तेः एवमग्रेपिनाम्नांस्त्रीलिंगत्वेदेवताविशेष्या दैवतमित्यनेनदेवतायाअप्युक्तप्रायत्वात् दैवतशब्दस्यस्वार्थिकतल्प्रत्ययांतात्स्वार्थिकाण्प्रत्ययेनसाधितत्वात् पुल्लिंगत्वेविष्णोर्नामसहस्रंमेइत्युक्तोविष्णुर्विशेष्यः नपुंसकत्वे

तुदैवतमेवंकिमेकमित्यादिनोक्तं यत्तद्विश्वशब्देनव्याख्यातंकिंतदित्यपेक्षायामाह विष्णुरितीति भाष्ये अयमभिप्रायः तमुस्तोतारःपूर्व्यंयथाविदऋतस्य गर्भंजनुषापिपर्त्तनं आस्यजानंतोनामचिद्विवक्तनमहस्तेविष्णोसुमतिंभजामहइत्यृचाविष्णुपदवत्याविष्णोर्नामकीर्त्तनंसम्यक्ज्ञानप्राप्तयेऽभिहितं अतः किमेकंदैवतमित्यत्रविष्णुरेवोक्तइति ऋगर्थस्तुतंप्रसिद्धंपूर्व्यंजगत्कारणं हेजनाःस्तोतारःस्तुत लोडर्थेव्यत्ययेनलुट् सर्वानुदात्तत्वान्नतृजंतशंकाकार्या यथाविद्गुणानामानंत्येपिस्वमतिपरिणामावधीत्यर्थः किंभूतंजगत्कारणंऋतस्यगर्भंवेदांतप्रतिपाद्यं स्तुतेःफलमाह जनुषापिपर्त्तनेति जन्मपूर्यतां जन्म समाप्तिःफलमितिभावः स्तुत्यसंभवेजानंतोयूयमस्यपरमात्मनोनामचिन्नामापिविविक्तनवदत एवंपरानुपदिश्यश्रुतयःस्वयमूचुः एतेभजंतुमाभावयंतुते महःप्रकाशात्मकंस्वरूपंहेविष्णोसुमतिमुद्दिश्यभजामहेसेवामहइति वेवेष्टिव्याप्नोतिविष्णुः विष्लृव्याप्तौजुहोत्यादिः दाभाभ्यांनुरित्यधिकारेविषेःकि च्चेतिनुप्रत्ययः यस्माद्विश्वमिदंसर्वंजातंतस्यमहात्मनः तस्मादेवोच्यतेविष्णुर्विशेर्धातोःप्रवेशनादितिविष्णुपुराणोक्तनिर्वचनेतुबाहुलकान्नुर्बोध्यःप्रका रश्च वषट्क्रियतेअस्मिन्नितिवषट्कारोयज्ञः घञ् यज्ञोवैविष्णुरितिश्रुतेः स्वाहादेवहविर्दानेश्रौषड्वौषड्वषट्स्वधेत्युक्तेर्वषट्हविर्दानंकरोतीतिवातथा कर्मण्यण् जुह्वतेचवितानाग्नीन्यजंतेपंचभिर्मखैरित्युक्तेः भूतानांजातानांभव्यानांजनिष्यमाणानांभवतांजायमानानांचप्रभुरीश्वरोभूतभव्यभवत्प्रभुः कालत्रैयवर्त्यैश्वर्यवानित्यर्थः भूसत्तायामित्यस्मात्गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्चेतिसूत्रेणएभ्योयःक्तःसकर्त्तरिभावकर्मणो श्चेत्यर्थकेनभूतेकर्त्तरिक्तः श्र्युकःकितीतीण्णिषेधः भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्यावाइतिसूत्रेणभव्यादयःकृत्यप्रत्ययांताःकर्त्तरिनिपा त्यंते कर्त्तरीत्यधिकारात् कृत्यानांचभविष्यदर्थकस्वभावत्वात् भव्यशब्देनजनिष्यमाणलाभः भवदितिवर्त्तमानलडादेशशतृप्रत्ययांतं प्रभुरित्यत्रविप्र संभ्योड्वसंज्ञायामितितत एवडुः कृद्योगेषष्ठीसमासः नलोकाव्ययेत्यत्रउप्रत्ययग्रहणेऽपिसानुबंधकत्वान्नास्यग्रहणमितिषष्ठीनिषेधोन रजोगुणमाश्रित्यवि

रंचिरूपेणभूतानिकरोतीतितमोगुणमधिष्ठायरुद्रात्मनाकृंततीतिवाभूतकृत् डुकृञ्करणइत्यस्मात्कृतीच्छेदनइत्यस्माद्वाक्विप्चेतिसूत्रेणक्विप् आद्येकृस्वस्य पितिकृतीतितुक् भूतन्याय्यमेवकरोतीतितथा भूतंक्ष्मादौपिशाचादौन्याय्येसत्योपमानयोरितिविश्वः योवैनकामान्नभयान्नक्रोधान्नार्थकारणात् अन्याय्यमनुवर्त्तैतस्थिरबुद्धिरलोलुपइत्युद्योगपर्वगतपरमात्मपरवचनादितितुभक्ताः सत्वगुणमधिष्ठायभूतानिबिभर्त्तिधारयतिपोषयतिवाभूतभृत् डुभृञ्धारणपोषणयोः क्विप् भवनंभावःसत्तात्मकः भूधातोर्भावेघञ् भूतानामात्माअंतर्यामीभूतात्मा एषआत्मांतर्याम्यमृतइतिश्रुतेः यदाप्नोतियदादत्तेयच्चात्तिविषयानिह यच्चास्यसंततोभावस्तस्मादात्मेतिगीयतेइत्यात्मशब्दनिर्वचनं अत्रार्थत्रयेआत्मशब्दस्यपृषोदरादित्वंकल्पनीयं चतुर्थेतुसातिभ्यांमनिन्मनिणावितिमनिण् षोंतकर्मणीतिधातुस्तस्मान्मनिन्प्रत्ययेसामेतिरूपं भूतेषुभक्तेषुआत्माचित्तमस्यभूतात्मा भीष्मादिभक्तानुपक्रम्यततोमेतद्गतंमनइतिमहाभारतोक्तेः

पूतात्मापरमात्माचमुक्तानांपरमागतिः॥ अव्ययःपुरुषःसाक्षीक्षेत्रज्ञोऽक्षरएवच॥ १५॥

भूतानिभावयतिउत्पादयतिभूतभावनः णिजंताद्भूधातोर्नंद्यादित्वाल्ल्युः भूतानांभक्तानांभावनाकथमयमाराध्येतकथमीक्ष्येतकथमालप्येतकथंवालभ्येतकथमस्माननुकंपेतकथमस्मान्पश्येत्कथमाभाषेतकथंवास्वीकुर्यात्इत्यादिरूपायत्रसभूतभावनः तत्तेनुकंपांप्रसमीक्षमाणोभुंजानएवात्मकृतंविपाकं हृद्वाग्वपुर्भिर्विदधन्नमस्तेजीवेतयोमुक्तिपदेसदायभागितिदशमेश्रीकृष्णपरब्रह्मवचनादितिभक्ताः ॥ १४ ॥ पूतात्मेति पूयतेस्म पूञ्पवनेक्तः पूतःशुद्धः आत्मापूतात्मा केवलोनिर्गुणश्चेतिश्रुतेः परमःकार्यकारणविलक्षणश्चासावात्माचपरमात्मा नित्यशुद्धबुद्धमुक्तस्वभावइत्यर्थः मुक्तानांपरमाप्रकृष्टागतिर्गंतव्यादेवतामुक्तानांपरमागतिः पुनरावृत्त्यसंभवात्तद्गतस्यमामुपेत्यतुकौंतेयपुनर्जन्मनविद्यतेइतिभगवद्वचनं मुच्लृमोक्षणेक्तः पिपर्तीतिपरापॄपालनपूर

णयोः पचादित्वादच् उत्वाभावोगुणेनपरेणबाधात् मातिसर्वत्रसर्वाभिलषणीयत्वमितिमा अन्येभ्योपिदृश्यंतइतिडविधौअपिशब्दस्यसर्वोपाधिव्यभिचारार्थत्वेनधात्वंतराद्प्युपपदाभावेपिडः परामायस्याःपरमेतिबहुव्रीहिः गतिरित्यत्रकर्मणिस्त्रियांक्तिन् अत्रचतुर्थ्यंतनामनिर्देशेमुक्तानांपरमायैगतयेइतिभवतिनतुमुक्तानांपरमगतयइति विधौविभक्तिभेदेनदेवतानिर्देशनिगदेषुतथैवकथनस्यअग्निंपावकमावहेत्यादौसिद्धांतितत्वात् अविद्यमानोव्ययोनाशोस्याव्ययः विपूर्वादिणूगतावित्यस्माद्भावेएरचिव्ययशब्दनिष्पत्तौनञोस्त्यर्थानांवाच्योवाचोत्तरपदलोपइतिबहुव्रीहावुत्तरपदलोपः पुरुषुभूरिषुशरीरेषुसीदतीतिपुरूणिसर्वकर्मफलानिसनोतिददातीतिवा पुरूणिभुवनानिस्यतिसंहारसमयेनाशयतीतिवापुरुषः षद्लृविशरणगत्यवसादनेषुषणुदानेषोंतकर्मणिएषामन्यतममाहुः सर्वत्रषत्वंबाहुलकात्सुषामादित्वाद्वा नवद्वारंपुरंपुण्यमेतैर्भावैःसमन्वितं व्याप्यशेतेमहात्मायत्तस्मात्पुरुषउच्यतइतिमहाभारते सर्वकर्मफलदातृत्वंसर्वसंहारकत्वंचभगवतिप्रसिद्धमेव पूर्वमेवाहमिहासमितितत्पुरुषस्यपुरुषत्वमितिश्रुत्यनुसारेतुपृषोदरादित्वंबोध्यं पुरअग्रगमनइत्यस्मात्पुरःकुषन्नित्युणादिसूत्रेणव्युत्पन्नस्यपुरुषशब्दस्यार्थःश्रुतावुक्तइतिवाबोध्यं साक्षादव्यवधानेनसर्वस्यद्रष्टासाक्षीसाक्षाद्द्रष्टरिसंज्ञायामितिसूत्रेणइनौअव्ययानांभमात्रेटिलोपः परमात्मसंज्ञायामेवसंज्ञायामित्यस्यस्वारसिकत्वं व्यवहारसाक्षिणितुगौण्यासाक्षिशब्दप्रयोगः क्षेत्रंशरीरंजानातीतिक्षेत्रज्ञः क्षेत्रज्ञंचापिमांविद्धि इच्छाद्वेषइत्याद्युक्त्वाएतत्क्षेत्रंसमासेनसविकारमुदाहृतं एतद्योवेत्तितंप्राहुःक्षेत्रज्ञइतितद्विदइतिचभगवदुक्तेः क्षीयतेधान्यमत्र क्षिनिवासगत्योःष्ट्रन् तस्मिन्नुपपदेआतोनुपसर्गेकइतिकप्रत्ययेरूपं सएवनक्षरतीत्यक्षरः एवकारात्क्षेत्रज्ञाक्षरयोरभेदःपरमार्थः तत्त्वमस्यादिश्रुतेः चकाराद्व्यावहारिकोभेदः प्रसिद्धेरप्रमाणत्वादितिभाष्ये क्षरसंचलनेअच् नञ्समासः अश्नोतेर्वासइतिमहाभाष्योक्तेरशूव्याप्तावित्यस्मादशेःसरन्नितिसरन्प्रत्ययेव्यापकइत्यर्थोवा ॥ १५ ॥

योगइति ज्ञानेंद्रियाणिसंयम्यसर्वाणिमनसासह एकत्वभावनायोगःक्षेत्रज्ञपरमात्मनोरित्युक्तयोगप्राप्यत्वात्योगः युजसमाधौघञ्चिजोरितिकुत्वं उक्तयोगंविंदंतिलभंतइतियोगविदस्तेषांनेतानिर्वाहकोज्ञानिनांयोगक्षेमवहनादिनेतियोगविदांनेता विद्लृलाभेइत्यस्मात्क्विप् णीञ्प्रापणेतृञ्गुणौ अत्रच तुर्थ्यंतंयोगविदांनेत्रेइतिभवति प्रधानंप्रकृतिर्मायापुरुषोजीवस्तयोरीश्वरःप्रधानपुरुषेश्वरः प्रपूर्वात्डुधाञोधिकरणेकरणाधिकरणयोश्चेतिल्युट् पुरुषःसाधितः इशऐश्वर्ये स्थेशभासपिसकसोवरच् नरसिंहयोरिववपुरस्यनरसिंहवपुः ज्हस्वादिः नरतीतिनरः नॄनयेअच् सिंचतीतिसिंहः सिचःसंज्ञायांहनुमौकश्चेतिसूत्रेणकप्रत्ययेहकारादेशनुमौ उणादिषुअवयवार्थानुगमस्यप्रायशोऽभावादवयवार्थाभावेपिनक्षतिः अन्येतुसिंहोवर्णविपर्ययादित्यनुसारेण हिनस्तिसिंहइत्याहुः हिसिहिंसायांअच् उप्यतेकर्मणावपुः डुवपूबीजसंताने जनेरुसिरित्यधिकारेअर्त्तिपॄवपियजितनिर्धानेभ्योनिदितिउसिः नार

योगोयोगविदांनेताप्रधानपुरुषेश्वरः॥ नरसिंहवपुःश्रीमान्केशवःपुरुषोत्तमः॥ १६॥

सिंहवपुरितिभक्ताः श्रीरस्यास्तिनित्यंश्रीमान्नित्ययोगेमतुप् श्रियतेसर्वैःश्रीः क्विबचिप्रच्छ्यायतस्तुकटप्रजुश्रीणांदीर्घोसंप्रसारणंचेतिक्विपिदीर्घः प्रशस्ताः केशाःसंत्यस्यकेशवः केशाद्वोऽन्यतरस्यामितिवः क्लिश्यतेकेशः क्लिशबंधे क्लिशेरन्लोलोपश्चेत्यन् यस्मात्त्वयैषदुष्टात्माहतःकेशीजनार्दन तस्मात्केशवनाम्नात्वंलोकेगेयोभविष्यसीतिविष्णुपुराणानुसारेणतुपृषोदरादित्वं पुरुषोत्तमः यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः भाष्येतुपुरुषाणामुत्तमइत्युक्तंतदार्थिकाभिप्रायेणनत्वेवंविग्रहेसमासः ननिर्द्धारणइतिषष्ठीसमासप्रतिषेधात् नचसव्यर्थोरूपाविशेषात्इतिवाच्यं षष्ठीसमासेअंतोदात्तत्वंसप्तमीसमासेतुपूर्वपदप्रकृतिस्वरत्वमितिविशेषात् उत्ताम्यतीत्युत्तमः तमुग्लानौ ॥ १६ ॥

सर्वइति स्रियतेकारणत्वेनानुगम्यतेसर्वः सृगतौ सर्वनिघृष्वरिष्वलघ्वशिवपट्वप्रह्वेष्वाअतंत्रेइतिअकर्त्तरिवन्प्रत्ययांतोनिपात्यते असतश्चसतश्चैवसर्वस्यप्र भवाप्ययात् सर्वस्यसर्वदाज्ञानात्सर्वमेनंप्रचक्षतइतिउद्योगपर्वणि यत्तुसइतिसम्यगाप्नोतिसर्वमर्थमितिसर्वइतिभक्तैर्विगृहीतंतत्रातंत्रइतिसूत्रैकदेशविरोधः अतएवअतंत्रेकिंसर्तासारकइतिप्रत्युदाहृतंवृत्तौ सर्वंसमाप्नोषिततोसिसर्वइतितुलक्षणादिनानेयं सर्वायेतिचतुर्थ्यंतं शृणातिसकलाःप्रजाःसंहारेइतिशर्वः शॄहिंसायां कॄगॄदॄशॄभ्योवः शेतेऽस्मिन्सर्वंशिवः भाष्येतुनिस्त्रैगुण्यतयाशुद्धत्वात्शिवइत्युक्तं तिष्ठतीतिस्थाणुः स्थिरत्वात् दाभाभ्यांनुरित्यधिकारेस्थइति सूत्रेणनुप्रत्ययेणत्वंबाहुलकात् स्थाणुःकीलेस्थिरेहरेइतिकोशः भूतानामादिःकारणत्वाद्भूतादिः आदीयतेकार्योत्पत्तयेआदिः आङ्पूर्वोडुदाञ्दानेइति

सर्वःशर्वःशिवःस्थाणुर्भूतादिर्निधिरव्ययः संभवोभावनोभर्त्ताप्रभवःप्रभुरीश्वरः ॥ १७॥

धातुः उपसर्गेघोःकिः निधीयतेस्थाप्यतेआदरेणनिधिः सएवनिधिर्विशेष्यते अव्ययइति अविनश्वरोनिधिरित्यर्थः यत्तुभाष्येप्रलयेस्मिन्सर्वंनिधीयत इतिनिधिः कर्मण्यधिकरणेचेतिकिप्रत्ययइत्युक्तंतत्कर्मण्युपपदेघोःकिःस्यादधिकरणेर्थे जलानिधीयंतेअस्मिन्जलधिरितिव्याख्यानेनवृत्तिकारादि कृतेनविरुद्धं कर्मणिअधिकरणेचप्रत्ययोभवतीतिव्याख्यानेसूत्रवैयर्थ्याच्च भावेअकर्त्तरिचकारकेइत्यधिकारात् बाहुलकात्कर्मोपपदाभावेपितेनकि प्रत्ययइतिवाकथंचित्समाधेयं चतुर्थ्यंतंतुनिधयेअव्ययायेतिबोध्यं नत्वव्ययायनिधयइति सत्यपिविशेषणविशेष्यभावेपाठक्रमबाधेमानाभावात् नहि भिन्नपदमपिविशेषणंपूर्वंप्रयोज्यमितिनियमःसमस्ति विशेषणविशेष्यभावेविनिगमनाविरहाच्च एवमेवाग्नयेपवमानायेत्यादिषुस्थितं सम्यक्भवोभव नमस्यसंभवः धर्मसंस्थापनार्थायसंभवामियुगेयुगेइत्युक्तेः ऋदोरबित्यबंतेनभवशब्देनबहुव्रीहिः सर्वेषांभोक्तॄणांफलानिभावयतीतिभावनः फलमतउ

पपत्तेरितिन्यायात् प्रपंचस्याधिष्ठानत्वेनभरणात्भर्त्ता तृजंतः प्रभवत्यस्मात्जगत्प्रभवः अपादानेअप् सर्वासुक्रियासुसामर्थ्यात्प्रभुः ईष्टेइतिईश्वरःसा मान्यतः एषसर्वेश्वरइतिश्रुतेः ॥१७॥ स्वयमिति स्वयमेवभवतिविद्यतेस्वयंभूः क्विप् शंसुखंभक्तानांभावयतीतिशंभुः शमितिमांतेऽव्ययउपपदेभूधातो रंतर्भावितण्यर्थान्मितद्र्वादिभ्यउपसंख्यानमितिडुः दीयतेखंड्यतेइतिदितिः दोअवखंडनेस्त्रियांक्तिन् तद्विरुद्धाअदितिर्देवमातातस्याअपत्यंवामनाव तारेआदित्यः दित्यदित्येतिण्यः पुष्करेकमलेइवाक्षिणीयस्यपुष्कराक्षः बिसप्रसूनराजीवपुष्करांभोरुहाणिचेतिकोशः पुष्णातिजलं पुषपुष्टौवा

स्वयंभूःशंभुरादित्यःपुष्कराक्षोमहास्वनः॥ अनादिनिधनोधाताविधाताधातुरुत्तमः॥ १८॥

इलकात्करन्गुणाभावः अश्नुतेव्याप्नोतिविषयमक्षि चक्षुषःप्राप्यकारित्वांगीकारात् बहुव्रीहौसक्थ्यक्ष्णोरितिषच् महान्उत्कृष्टःस्वनोनमेभक्तःप्रणश्य तीत्यादिर्वेदरूपोवायस्यमहास्वनः अस्यमहतोभूतस्यनिःश्वसितमेतदितिश्रुतेः बहुव्रीहावान्महतइत्यात्वं नचतत्रसन्महदितिप्रतिपदोक्तसमासएव ग्राह्यइतिवाच्यं महाबाह्वाद्यनुरोधेनसमानाधिकरणपदसामर्थ्याच्चलक्षणप्रतिपदोक्तपरिभाषाप्रवृत्तेस्तत्रानंगीकारात् प्रतिपदोक्तसमासग्रहणेतस्यस मानाधिकरणोत्तरपदत्वनियमेनसमानाधिकरणपदसामर्थ्यादन्यत्राप्यात्वमितिव्याख्यातृभिःस्वीकारात् यत्तुभाष्येमहानूर्जितःस्वनोनादःश्रुतिलक्ष णोवायस्यसमहास्वनइत्युक्त्वासन्महदितिसमासेआन्महतइत्यात्वमित्युक्तंतत्कर्मधारयान्मत्वर्थीयोच् तद्वतिलक्षणांवास्वीकृत्यकथंचिन्नेयंनत्वात्वार्थं

प्रतिपदोक्तसमासापेक्षेतिसुधीभिर्ध्येयं नस्तआदिनिधनेजन्मविनाशावस्यअनादिनिधनः निपूर्वाद्धाञ्धातोःकृपृवृजिमंदिनिधाञः क्युरितिक्यौनिध नशब्दः निधनंस्यात्कुलेनाशइतिविश्वः अनंतादिरूपेणविश्वंदधातिधाता कर्मणांतत्फलानांचकर्त्ताविधाता विपूर्वस्यधाञः कृञ्समानार्थकत्वात् धातु र्विरंचेःसकाशादुत्तमउत्कृष्टोधातुरुत्तमः चतुर्थ्यंतकरणेधातुरुत्तमायेतिभवतिनतुधात्रुत्तमायेतिबोध्यं अथवाधातुशब्दस्योकारांतत्वांगीकारेणपृथिव्या दिधातुभ्यउत्कृष्टश्चिद्धातुरित्यर्थः अत्रपक्षेचतुर्थ्यंतकरणेधातवउत्तमायेतिभवतिनतुधातूत्तमायेति धातुःउत्तमइतिद्वेनामनीवा कार्यकारणप्रपंचधारणात्प रमात्मैवधातुरित्युच्यते धाञः सितनिगमिमसिसच्यविधाञ्कुशिभ्यस्तुन्नितितुन् सर्वेषामुद्गतानामतिशयेनोद्गतत्वादुत्तमः ॥ १८॥ अप्रमेयइति शब्दादि

अप्रमेयोहृषीकेशःपद्मनाभोमरप्रभुः॥ विश्वकर्मामनुस्त्वष्टास्थविष्ठःस्थविरोध्रुवः॥ १९॥

हीनत्वान्नप्रत्यक्षगम्यः नाप्यनुमानगम्यः तद्व्याप्तिलिंगाभावात् नाप्युपमानसिद्धोनिर्भागत्वेनसादृश्याभावात् नाप्यर्थापत्तियाह्यस्तंविनानुपपद्यमानस्या भावात् नाप्यनुपलब्धिगोचरोभावरूपत्वात् अभावगोचरत्वाच्चषष्ठप्रमाणस्य नापिशास्त्रप्रमाणवेद्यः प्रमाणजन्यातिशयाभावात् यद्येवंशास्त्रयोनित्वं कथं उच्यते प्रमाणादिसाक्षित्वेनप्रकाशरूपस्यप्रमाणाविषयत्वेप्यध्यस्ततद्रूपनिवर्तकत्वेनशास्त्रप्रमाणकत्वमित्यप्रमेयइतिभाष्ये नप्रमातुंमहाबाहुःश क्योहंमधुसूदन परंह्यपरमेतस्माद्विश्वरूपान्नभिद्यतइतिहरिवंशे प्रपूर्वान्माङ्मानइत्यस्मात्कर्मणिशक्यार्थेअचोयत् ईद्यतीतीत्वं हृषीकाणामिंद्रियाणा मीशःक्षेत्रज्ञरूपेणहृषीकेशः यद्वाइंद्रियाणामीशोनजीववदनीशः यस्यवासूर्यरूपस्यचंद्ररूपस्यजगत्प्रीतिकराहृष्टाःकेशाःरश्मयःसः पृषोदरादित्वात्सा धुत्वं तथाचमोक्षधर्मे सूर्याचंद्रमसोःशश्वदंशुभिःकेशसंज्ञितैः बोधयन्स्थापयंश्चैवजगदुत्तिष्ठतेपृथक् बोधनात्स्थापनाच्चैवजगतोहर्षणंभवेत् अग्नीषो

मद्भक्तैरेवंकर्मभिःपांडुनंदन हृषीकेशोहमीशानोवरदोलोकभावनइति अग्नीषोमौसूर्याचंद्रमसौ भक्तसंबंधेनहृष्यतीतिहृषीः औणादिकःकीप्रत्ययः कानांसुसुखानामीशःकेशः हृषीश्चासौकेशश्चहृषीकेशः हर्षात्सुखात्सुखैश्वर्याद्धृषीकेशत्वमश्नुतइत्युद्योगपर्वस्थसंजयोक्तेरितितुभक्ताः जगत्कारणंपद्मंनाभावस्यपद्मनाभः अजस्यनाभावध्येकमर्पितं यस्मिन्विश्वाभुवनानितस्थुरितिश्रुतेः पदगतौअस्मान्मप्रत्ययेपद्मं नह्यतेनाभिः नहबंधने नहोभश्चेतीञ् नाभिःस्यात्क्षत्रियेपुंसिप्राण्यंगेतुस्त्रियांमताप्राण्यंगेपुंस्यपीतिकेचित् भगवदवयवेगौणोयं सप्तमीविशेषणेबहुव्रीहावितिज्ञापकाद्व्यधिकरणसमासः आहिताग्न्यादिः अच्प्रत्ययन्ववपूर्वात्सामलोम्नइत्यत्राजितियोगविभागादच् नम्रियंतेऽमरादेवाः मृङ्प्राणत्यागेअच् तेषांप्रभुःअमरप्रभुः विश्वंकर्मकृतिविषयोस्यविश्वकर्मा जगद्वाचित्वादित्यधिकरणेयोवैवालोकेएतेषांपुरुषाणांकर्तायस्यवैतत्कर्मसवैवेदितव्यइतिश्रुतेरेतत्प्रत्यक्षाद्युपस्थितंजगद्यस्य कर्मकृतिविषयइत्येवंपरतयाव्याख्यानस्यसिद्धांतितत्वात् कृञःकर्मणिसर्वधातुभ्योमनिनितिमनिनाकर्मशब्दव्युत्पादनसंभवाच्च विश्वानिसर्वाणिसारथ्यादीनिकर्माणिअस्यसःविश्वकर्मा स्वस्वरूपंभक्तस्वरूपंचानपेक्ष्यकृपयोच्चावचानिकर्माणिकरोतीत्यर्थइतितुभक्ताः तदातुभावेमनिन्बोध्यः मनुतेमनुः मनज्ञानेऔणादिकउः नान्योतोस्तिमंतेतिश्रुतेः संहारसमयेजगत्त्वक्षतितनूकरोतित्वष्टा त्वक्षूतनूकरणे तृचिस्कोरितिकलोपः अतिशयेनस्थूलःस्थविष्ठः स्थूलस्थूलतरस्थूलतमादिरूपेणतस्यैववर्त्तमानत्वात् त्वंस्त्रीत्वंपुमानसित्वंकुमारउतवाकुमारीत्वंजीर्णोदंडेनवंचसित्वंजातोभवसित्वंविश्वतोमुखइतिश्रुतेः स्थाधातोःकितिऊलप्रत्ययेनउत्पन्नात्स्थूलशब्दादतिशायनेइष्ठन् स्थूलदूरयुवेत्यादिनायणादिपरलोपपूर्वगुणयोरवादेशेउक्तरूपनिष्पत्तिः स्थविरोध्रुवइत्येकंनामेतिभाष्ये स्थविरोवृद्धः अनादित्वात्तादृशोपिध्रुवोनिर्विकारइतिस्थविरोध्रुवः अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराइतिकिरजधिकारस्थसूत्रेतिष्ठतेर्वुकिन्ह्रस्वत्वेचस्थविरः ध्रुगतिस्थैर्ययोरित्यत्रध्रुवेतिपाठांतरादिगुपधेतिकः स्थविरायध्रुवायेतिचतुर्थ्यंतं ॥ १९ ॥

अग्राह्यइति शब्दैर्नमनसावानगृह्यतइत्यग्राह्यः यतोवाचोनिवर्त्तंतेअप्राप्यमनसासहेतिश्रुतेः ग्रहउपादानेण्यत् बलेनग्रहीतुंनशक्योवा दुर्ग्राह्यःपाणिना वायुर्दुःस्पर्शःपाणिनाशशी दुर्द्धरापृथिवीमूर्ध्नादुर्ग्राह्यःकेशवोबलादित्युद्योगपर्वोक्तेः परमोपादेयत्वान्नास्तिग्राह्योन्योऽस्मादितितुभक्ताः शश्वत्सर्वेषुकाले षुभवःशाश्वतः शाश्वतंशिवमच्युतमितिमंत्रात् शशप्लुतगतौ वप्रत्ययेशश्वच्छब्दोऽव्ययंतत्रभवइत्यण् कर्षतिस्त्रीणांमनःकृष्णः श्रुतमात्रोपियःस्त्रीणांप्र सह्याकर्षतेमनः उरुगायोरुगीतोवापश्यंतीनांकुतःपुनरितिश्रीभागवतात् कृषिर्भूवाचकःशब्दोणश्वनिर्वृतिवाचकः विष्णुस्तद्भावयोगाच्चकृष्णोभवतिशा श्वतइत्युद्योगपर्वानुसारेतुपृषोदरादित्वं भूवाचकःसद्वाचकः निर्वृतिवाचकःआनंदवाचकः तद्भावयोगात्सदानंदत्वयोगात् कृष्णोवर्णोह्यमेयस्मात्तस्मात्कृ ष्णोहमर्जुनेतिवा कृषविलेखने कृषेर्वर्णेइतिनक् लोहितेअक्षिणीअस्यल्लोहिताक्षः यएषोंतरादित्येहिरण्मयःपुरुषइतिप्रकृत्यतस्ययथाकप्यासंपुंडरीक

अग्राह्यःशाश्वतःकृष्णोलोहिताक्षःप्रतर्दनः॥ प्रभूतस्त्रिककुब्धामपवित्रंमंगलंपरं॥ २०॥

मेवमक्षिणीइतिश्रुतेः समोवृषभोलोहिताक्षइंइतिमंत्रवर्णाच्च प्रलयेभूतानिप्रतर्दतिप्रतर्दनः तर्दहिंसायांनंद्यादिः ज्ञानैश्वर्यादिगुणैःसंपन्नःप्रभूतः ऊर्ध्वाधो मध्यभेदेनतिसृणांककुभांधामत्रिककुब्धामेत्येकंनाम त्रैङ्पालनेडिप्रत्ययेत्रिशब्दः ककलौल्येउभिप्रत्ययेककुप्शब्दः डुधाञ्धातोरातोमनिन्कनिब्व निपश्चेतिमनिन्निधामशब्दः तिसृणांककुभांसमाहारस्त्रिककुप्तस्यधामेतिविग्रहः भाष्यंतुफलितार्थपरतयानेयं समाहाराभावेप्रकृतसमासानिष्पत्तिः दिक्संख्येसंज्ञायांतद्धितार्थोत्तरपदसमाहारेचेत्यनयोर्नियमार्थत्वात् त्रिलोकनाथेनेत्यादौस्त्रियांङीबादिप्रसंगात् समाहारद्विग्वसंभवेमध्यमपदलोपिस मासस्यांगीकारात् प्रकृतेतुसत्यपिसमाहारद्विगौनकिंचिदनिष्टमितिसमाहारद्विगुरेवात्रेतिसुधीभिरुन्नेयं पुनातिपवित्रं पुवःसंज्ञायां कर्त्तरिचर्षिदेवतयो

रितिपाणिनिस्मरणात् पूञइत्रः पूधातोःकरणेइत्रोभवतिसंज्ञायामितिप्रथमसूत्रार्थः येनाज्यमुत्पूयतेयच्चानामिकावेष्टनंतत्पवित्रमित्युदाहरणं अनंतर्गर्भिणंसाग्रंकौशंद्विदलमेववा प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचिदितिस्मरणं पूधातोरित्रःस्यादृषौकरणेदेवतायांचकर्त्तरीतिद्वितीयसूत्रार्थः ऋषिर्वेदः तदुक्तमृषिणा सूर्यआत्माजगतस्तस्थुषश्चेत्यनुक्रमणीदर्शनात् संबुद्धौशाकल्यस्येतावनार्षेइत्यत्रअनार्षेअवैदिकेइतिव्याख्यानाच्च पूयतेअनेनेतिपवित्रंमंत्रजातं पुनातीतिपवित्रंदेवता अग्निःपवित्रंसमापुनात्वित्युदाहरणं प्रकृतेतुकर्त्तरिदेवतायांवाच्यायांप्रत्ययः प्रसंगात्तुसूत्रव्याख्यानमुदाहरणंचलिखितं स्मृतिमात्रेणयत्पुंसांतनोतिशुभसंततिं अशुभानिनिराचष्टेब्रह्मतन्मंगलंविदुरितिविष्णुपुराणोक्तेः सर्वमंगलेभ्यउत्कर्षान्मंगलंपरं एकनामेदमितिभाष्यकृतः मंगेरलजित्यलच् मगिगतौ अत्रपरशब्दस्यमंगलविशेषणत्वात्सर्वनामकार्यं तथाचचतुर्थ्यंतकरणेमंगलायपरस्मैइतिभवतीतिबोध्यं ॥ २० ॥

ईशानःप्राणदःप्राणोज्येष्ठःश्रेष्ठःप्रजापतिः॥ हिरण्यगर्भोभूगर्भोमाधवोमधुसूदनः॥ २१ ॥

ईशानइति ईष्टेईशानः सर्वभूतनियंतृत्वात् लटःशतृशानचावितिशानच् वर्त्तमानेलडित्यतोलड्ग्रहणानुवृत्तिसंभवादधिकंलड्ग्रहणमधिकविधानार्थं तेनप्रथमासामानाधिकरण्येऽपिक्वचित्सन्ब्राह्मणः अस्तिब्राह्मणइत्युदाहृतत्वान्नासाधुता ताच्छील्येचानश्वा प्राणान्ददातिचेष्टयतिकालात्मनाद्यतिखंडयतिवाप्राणदः अनप्राणने अच् अनितेरितिणत्वं नप्राणेननापानेनमर्त्त्योजीवतिकश्चन इतरेणतुजीवंतियस्मिन्नेतावुपाश्रिताविति श्रुतेः प्राणितिप्राणः सर्वप्राणरूपत्वात्तस्य वर्द्धतेवृद्धः वृधुवृद्धौ अकर्मकत्वात्कर्त्तरिक्तः अतिशयेनवृद्धःज्येष्ठः सर्वकारणरूपत्वात् वृद्धस्यचेतिइष्ठनिज्यादेशः अतिशयेन प्रशस्यःश्रेष्ठः प्रशस्यस्यश्रइतिश्रादेशः प्रशस्यतइतिप्रशस्यः शंसुस्तुतौ कर्मणिक्यप् एतिस्तुशास्वृदृजुषःक्यबितिसूत्रेशंसिदुहिगुहिभ्योवेतिकाशिकोक्तेः

प्रशस्यस्यश्रइतिनिर्देशात्ईडवंदवृशंसदुहांण्यतइतिज्ञापकाच्चशंसेःसिद्धंइतरयोस्तुमूलंमृग्यमित्यभियुक्तैरपिकथनाच्च प्रजायंतेप्रजाः उपसर्गेचसंज्ञाया मितिडः प्रजास्यात्संततौजनइतिकोशः पारक्षणे पातेर्डतिः प्रजानांपतिःप्रजापतिः हिरण्मयांडांतर्वर्त्तित्वात्हिरण्यगर्भोविरंच्यात्मनावा हिरण्यगर्भःस मवर्त्ततायइतिश्रुतेः न्हियतेहिरण्यं ह्रञ्हरणे राजेरन्यः शूरम्योश्चेतिचकारादन्यप्रत्ययेबाहुलकादित्वं गृणातिस्वंदुःखंगर्भः गॄनिगरणे अर्त्तिगॄभ्यांभन् ग र्भोभ्रूणेऽर्भेकेकुक्षाविितिविश्वः भवतीतिभूःसागर्भेअस्यभूगर्भःपृथिवीकारणत्वात् मायायाःश्रियोधवःपतिर्माधवःधूञ्कंपनेअच्मौनाद्ध्यानाच्चयोगाच्च विद्धिभारतमाधवमितिव्यासः मधुनामानमसुरंसूदितवान्मधुसूदनः कर्णमलोद्भवंवापिमधुंनाममहासुरं ब्रह्मणोपचितिंकुर्वन्जघानपुरुषोत्तमः तस्यता तवधादेवदेवदानवमानवाः मधुसूदनइत्याहुर्ऋषयश्चजनार्दनमितिभारते मन्यतेमधुः फलिपाटिनमिमनिजनांगुकूपटिनाकिधतश्चेत्यनेननकारस्यध

ईश्वरोविक्रमीधन्वीमेधावीविक्रमःक्रमः॥ अनुत्तमोदुराधर्षःकृतज्ञःकृतिरात्मवान्॥ २२ ॥

कारउप्रत्ययश्च नंद्यादित्वात्ल्युप्रत्ययेसूदनः युचूतुन सूददीपदीक्षश्चेतिनिषेधात् स्वरेभेदः ॥ २१ ॥ ईश्वरइति ईष्टेईश्वरः पुनः तवाष्टगुणमैश्वर्यंनाथ स्वाभाविकंपरं निरस्तातिशयंयस्यतस्यस्तोष्यामिकिंत्वहमितिविष्णुपुराणेकालियोक्तेः विक्रमऐश्वर्यंतदस्यास्तीतिविक्रमी क्रमुपादविक्षेपेघञिनोदा त्तोपदेशस्येतिवृद्धिनिषेधः धन्वास्यास्तीतिधन्वी कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवइतिसूत्रेणसिद्धोधन्वशब्दः अथास्त्रियां धनुश्चापौधन्वशरासन कोदंडकार्मुकमित्यमरोक्तेर्धनुःपर्यायस्ततोव्रीह्यादित्वादिनिः धन्वीधनुष्मान्धानुष्कइतिकोशः प्राशस्त्यार्थेनिनाशार्ङ्गधनुर्लाभः धन्वीपार्थइतिवा पांड वानांधनंजयइतिगीतासु विदग्धत्वाद्धन्वीतितुभक्ताः विविधगोपचरणेषुविदग्धइतिदशमे धन्वीधनुर्धरेपार्थेविदग्धेककुभद्रुमेइतिविश्वः धीर्धारणा

वतीमेधा मेधृसंगमेभिदाद्यङ् सास्यास्ति अस्मायामेधास्त्रजोविनिः मेधावी विनागरुडेनक्रमोगमनमस्य क्रमःक्रामतिजगत्क्रमः नास्त्युत्तमोयस्माद नुत्तमः दुःखेनशत्रुभिराधृष्यःदुराधर्षः त्रिधृषाप्रागल्भ्ये ईषद्दुःसुष्विति खल् प्राणिनांपुण्यापुण्यात्मकंकर्मकृतंजानातिकृतज्ञः पुरुषप्रयत्नरूपत्वात्कृतिः आत्मैवाधारत्वेनास्यास्तिआत्मवान् स्वेमहिम्निप्रतिष्ठितइतिश्रुतेः॥२२॥ सुरेशइति सुतरांराजंतेसुराः राजृदीप्तौडः तेषांदेवानामीशःसुरेशः शृणातिहिनस्ति दुःखमस्मिन्ननेनवाशरणं शॄहिंसायां ल्युट्करणेऽधिकरणेवा शरणंगृहरक्षित्रोरितिकोशः श्रृणातिदुःखंदुःखोत्पादकंकर्मवेतिशर्मसुखं सुखेदुःखाभिभा वकत्वस्यकर्मनाशकत्वस्यचप्रसिद्धेः शर्मशांतसुखानिचेत्यमरः परमात्मनएवमुख्यसुखरूपत्वात्शर्मेतिपरमात्मनामोपपद्यतेतरां विश्वंरेतोरेतःकार्यमस्य

सुरेशःशरणंशर्मविश्वरेताःप्रजाभवः॥ अहःसंवत्सरोव्यालःप्रत्ययःसर्वदर्शनः॥ २३ ॥

विश्वरेताः सर्वकारणत्वात् रीगतिरेषणयोः सर्वधातुभ्योऽसुन्इत्यधिकारेस्रुरीभ्यांतुट्चेत्यसुन्तुट्च रिणातिगच्छतीतिव्युत्पत्तेः भवत्यस्मात्भवः प्रजानां भवःप्रजाभवः ऋदोरप् प्रकाशरूपत्वादहरिवअहः नजहातिअहः नजिजहातेरितिकनिन् रोसुपीतिरत्वं सम्यग्वसत्यस्मिन्क्षणाद्ययनांतःकालोत्रसंवत्स रः वसनिवासे अशेःसरः वसेश्चसंपूर्वाच्चित्इतिसरप्रत्ययः अखंडकालरूपत्वाद्भगवतः विगतआलोबंधनमस्माद्व्यालः अलबंधने व्यालोदुष्टगजेसर्पेइति हलायुधकोशात्गजवत्सर्पवद्वाग्रहीतुमशक्यइत्यर्थोवा प्रतीतिःप्रत्ययः ज्ञानस्वरूपत्वात् प्रतिपूर्वादिण्गतावित्यस्मादेरच् सर्वंदर्शयतिस्वभक्तान्सर्वंपश्य तिवासर्वदर्शनः ॥ २३ ॥

अजइति नहिजातोनजायेयंनजनिष्येकदाचन क्षेत्रज्ञःसर्वभूतानांतस्मादहमजःस्मृतइतिमहाभारते नजायतेऽजः अन्येष्वपिदृश्यतइतिडः सर्वेषामी श्वराणामपीश्वरः नित्यनिष्पन्नरूपत्वात्सिद्धः षिधगत्यांगत्यर्थत्वात्कर्त्तरिक्तः येगत्यर्थास्तेज्ञानार्थाइत्यभ्युपगमात्सिद्धिर्ज्ञप्तिरूपःक्तिन् सर्वभूतानां कारणत्वात्सर्वादिः स्वरूपान्नच्यवतेअच्युतः च्युङ्गतौ शाश्वतंशिवमच्युतमितिश्रुतेः यस्मान्नच्युतपूर्वोहमच्युतस्तेनकर्मणेतिभगवद्वचनाच्च ॥१००॥ इतिनाम्नामाद्यंशतंविवृतं इतःपरंश्रोतृजामितापरिहारायव्याकरणंस्वल्पमेवलिख्यते वर्षतिसर्वकामान्वृषोधर्मः इगुपधेतिकः कात्तोयात्भूमिंअपात् कपिर्वराहः पाधातोरचइः बाहुलकादालोपः वृषश्चासौकपिश्चवृषाकपिः अन्येषामपिदृश्यतइतिदीर्घः आङ्प्रश्लेषोवा कपिर्वराहःश्रेष्ठश्चधर्मश्चवृषउ

अजःसर्वेश्वरःसिद्धःसिद्धिःसर्वादिरच्युतः॥वृषाकपिरमेयात्मासर्वयोगविनिःसृतः॥ २४॥
वसुर्वसुमनाःसत्यःसमात्मासंमितःसमः॥अमोघःपुंडरीकाक्षोवृषकर्मावृषाकृतिः॥ २५॥

च्यते तस्माद्वृषाकपिंप्राहकश्यपोमांप्रजापतिरितिव्यासवचनं स्मृतःसन्वर्षतिकामान्आकंपयतिचक्लेशान्वृषाकपिरितितुविष्णुर्यज्ञःपृश्निगर्भःसर्वदेवउ रुक्रमः वृषाकपिर्जयंतश्चेत्येकादशस्थपद्येश्रीधरस्वामिनः तत्रणिजंतादचइप्रत्ययेबाहुलकान्नुम्लोपः वृषोरिष्टनामासुरस्तमाकंपयतीतितुभक्ताः इयानि तिमातुंपरिच्छेत्तुंनशक्यआत्मास्वरूपमस्यअमेयात्मा सर्वेभ्योयोगेभ्यःसंबंधेभ्योविनिःसृतःसर्वयोगविनिःसृतः असंगोह्ययंपुरुषइतिश्रुतेः॥२४॥वसुरिति वसंतिसर्वभूतान्यस्मिन्वसतिवासर्वभूतेषुवसुः वसूनामस्मिपावकइत्युक्तोवावसुः वसुशब्देनधनवाचिनाप्राशस्त्यंलक्ष्यते प्रशस्तंरागादिभिःक्लेशैरकलुषितं मनोस्यवसुमनाः वसौभीष्मेमनोस्येतितुभक्ताः शरतल्पगतोभीष्मःशाम्यन्निवहुताशनः मांध्यातिपुरुषव्याघ्रततोमेतद्गतंमनइतिराजधर्मोक्तेः अवितथरू

पत्वात्सत्यः सत्यंज्ञानमनंतमितिश्रुतेः मूर्त्तामूर्त्तात्मकत्वाद्वा सच्चत्यच्चाभवदितिश्रुतेः अस्मिन्पक्षेछांदसत्वाद्रूपसिद्धिः पूर्वत्रतुतत्रसाधुरितियत्प्रत्ययेसत्यशब्दसिद्धिरितिबोध्यं समएकश्चासावात्माचसमात्मा समआत्मेतिविद्यादितिश्रुतेः संमितःअसंमितइतिवाच्छेदः सम्यक्शास्त्रेणमितःप्रमितइत्याद्यपक्षेअर्थः द्वितीयेतुअपरिच्छिन्नइत्यर्थः सर्वेषुकालेषुसर्वविकाररहितत्वात्समः मयालक्ष्म्यासहेतिवा अमोघःअवितथसंकल्पः सत्यसंकल्पइतिश्रुतेः हृदयाख्यंपुंडरीकंअश्नुतेव्याप्नोतिपुंडरीकाक्षः अक्षूव्याप्तौ वृषोधर्मस्तद्रूपंकर्मास्यवृषकर्मा वृषायधर्मायआकृतिरस्यवृषाकृतिः धर्मसंस्थापनार्थायसंभवामियुगेयुगेइतिवचनात्॥२५॥ रुद्रइति संहारकालेप्रजारोदयतिरुद्रः अंतर्भावितण्यर्थात्रुदेरक् सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमितिश्रुत्यनुसारेतुरोदितिरुद्रइतिबोध्यं शिवविष्ण्वोरभेदख्यापनायेदृशानिनामानिमध्येमध्येपठ्यंते उक्तंचहरिवंशेकैलासयात्रायांश्रीसदाशिवेनश्रीकृष्णंप्रति नामानितवगोविंदयानिलोके

रुद्रोबहुशिराबभ्रुर्विश्वयोनिःशुचिश्रवाः॥ अमृतःशाश्वतस्थाणुर्वरारोहोमहातपाः॥ २६॥

महांतिच तान्येवममनामानिनात्रकार्याविचारणेति रोदनंरुत्संपदादिः रुदंद्रावयतीतिरुद्रः रुदंद्रावयतेयस्मात्तस्माद्रुद्रोजनार्दनइतिब्रह्मांडोक्तेः द्रुधातोर्डप्रत्ययेरुद्रइतिदकारद्वयवद्रूपसिद्धिः बहूनिशिरांस्यस्यबहुशिराः सहस्रशीर्षापुरुषइतिश्रुतेः बिभर्त्तिलोकान्बभ्रुः विश्वस्ययोनिरुपादानकारणंविश्वयोनिः शुचीनिश्रवांसिनामान्यस्यशुचिश्रवाः शुचीनिशृणोतिवा शुचीनिश्रवणीयानिशृणोमीहधनंजय नचपापानिगृह्णामिततोहंवैशुचिश्रवाइतिमोक्षधर्मेषु नास्तिमृतंमरणमस्यामृतः अजरोऽमरइतिश्रुतेः शाश्वतश्चासौस्थाणुश्चशाश्वतस्थाणुः सर्वकालसंबंधीत्यर्थः शाश्वतस्थाणुरित्यत्रच विसर्गरहितएवपाठोभाष्यकृदुक्तकर्मधारयबलात्प्रतीयतेतेनचतुर्थ्यंतकरणे शाश्वतस्थाणवइतिभवतिनतुशाश्वतायस्थाणवइतिबोध्यं वरआरोहआरोहणमस्मिन्वरारोहः ब्रह्मप्राप्तानांपुनरावृत्त्यभावात् नसपुनरावर्ततइतिश्रुतेः महत्सर्वसृज्यविषयंतपोज्ञानमस्यमहातपाः ॥ २६ ॥

सर्वगइति सर्वंगच्छतीतिसर्वगः सर्वंवेत्तीतिसर्ववित् भातिसर्वत्रभानुः सर्वविच्चासौभानुश्चसर्वविद्भानुः सर्वज्ञःसन्सर्वत्रसद्रूपेणभासतइतिनामार्थः अत्र सर्वविद्भानवइतिभवतिनतुसर्वविदेभानवइति लाघवात् विषुसर्वतःअंचतिपलायतेविषूचीतादृशीसेनाजरासंधादीनामनेनविष्वक्सेनः पुंवद्भावेनङीप् निवृत्तौतन्निमित्तककार्यनिवृत्तेःसाधुता जनान्दस्यूनर्दयतिहिनस्तीतिजनार्दनः दस्युनाशाज्जनार्दनइत्युद्योगपर्वणि वेदयतितत्त्वंज्ञापयतिवेदः तेषामेवानुकंपार्थमहमज्ञानजंतमः नाशयाम्यात्मभावस्थोज्ञानदीपेनभास्वतेतिभगवदुक्तेः वेदंसमग्रमर्थतःपाठतश्चवेत्तिवेदवित् किंविधत्तेकिमाचष्टेकिमनूद्यविकल्पयेत् इत्यस्यत्हृदयंलोकेनान्योयद्वेदकश्चनइत्येकादशे सर्वैःअंगैःप्रतीकैःसाधनैःपुराणोक्तैर्वापूर्णःअव्यंगः वेदाःअंगानिपार्षदप्रायाअस्यवेदांगः

सर्वगःसर्वविद्भानुर्विष्वक्सेनोजनार्दनः॥ वेदोवेदविदव्यंगोवेदांगोवेदवित्कविः॥ २७॥
लोकाध्यक्षःसुराध्यक्षोधर्माध्यक्षःकृताकृतः॥ चतुरात्माचतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः॥ २८॥

कृष्णंचतत्रच्छंदोभिस्तूयमानंसुविस्मिताइतिदशमोक्तेः वेदान्विंदतिलभतेसांदीपनेरितिपुनःवेदवित् कविःक्रांतदर्शी ॥ २७ ॥ लोकेति लोकान्अध्यक्षयतिप्रत्यक्षीकरोतिलोकाध्यक्षः सुराणामिंद्रादीनांसात्विकानामध्यक्षःप्रत्यक्षःसुराध्यक्षः तत्रापिकथमतआह धर्मेणभगवद्धर्मेणाध्यक्षोधर्माध्यक्षः कृतःकार्यरूपेणाकृतःकारणरूपेणकृताकृतः सर्गादिषुपृथक्पृथक्चत्वारआत्मानःस्वरूपाणिविभूतयोस्यचतुरात्मा ब्रह्मादक्षादयःकालस्तथैवाखिलजंतवः विभूतयोहरेस्तातजगतःसृष्टिहेतवः विष्णुर्मन्वादयःकालःसर्वभूतानिचद्विज स्थितेर्निमित्तभूतस्यविष्णोरेताविभूतयः रुद्रःकालोंतकाद्याश्चसमस्ताश्चैवजंतवः चतुर्धाप्रलयायैताजनार्दनविभूतयइतिविष्णुपुराणे व्यूह्यात्मानंचतुर्द्धैषवासुदेवादिनामभिःसृष्ट्यादीन्प्रकरोत्येषविश्रुतात्माजनार्दनइतिव्या

सवचनाच्चतुर्व्यूहः वासुदेवप्रद्युम्नानिरुद्धसंकर्षणावासुदेवादयः चतस्रोदंष्ट्राअस्यचतुर्दंष्ट्रोनृसिंहविग्रहः चतुर्भुजःस्पष्टः ॥ २८ ॥ भ्राजिष्णुरिति प्रकाशै
करसत्वात्भ्राजिष्णुः श्यामत्वादिनात्यंतंभ्राजनशीलोभ्राजिष्णुः अतसीपुष्पसंकाशःपीतवासाजनार्दनः व्यभ्राजतसभामध्येहेम्नीवोपहितोमणिरित्युद्यो
गपर्वोक्तेरितितुभक्ताः भुज्यतेभोजनंभोग्यरूपंइत्यर्थः भुंक्तेभोक्ता सहिष्णुःसहनशीलः नसहतेभक्तानांपीडामसहिष्णुरितिभक्ताः एकतोधावते
चक्रमेकतोहरिवाहनं एकतोविष्णुदूताश्चवैष्णवेचार्दितेमयाइतियमवचनात् हिरण्यगर्भरूपेणजगदादौजायतेजगदादिजः अनघोनिष्पापः विजयतेज्ञा
नवैराग्यैश्वर्यादिभिर्विजयः जेतासर्वोत्कृष्टः विश्वश्चासौयोनिश्चपुनर्विश्वयोनिः पुनःपुनर्वसतितत्तदवतारेषुपुनर्वसुः ॥ २९ ॥ उपेंद्रइति इंद्रमुपगतोनु

भ्राजिष्णुर्भोजनंभोक्तासहिष्णुर्जगदादिजः॥ अनघोविजयोजेताविश्वयोनिःपुनर्वसुः॥ २९॥
उपेंद्रोवामनःप्रांशुरमोघःशुचिरूर्जितः॥ अतींद्रःसंग्रहःसर्गोधृतात्मानियमोयमः॥ ३०॥

जत्वेनउपेंद्रः ममोपरियथेंद्रस्त्वंस्थापितोगोभिरीश्वरः उपेंद्रइतिकृष्णत्वांगास्यंतिभुविदेवताइतिहरिवंशे बलिंवामनरूपेणयाचितवान्वामनः सएवजग
त्रयंक्रममाणः प्रांशुरभूदितिप्रांशुः तोयेतुपतितेहस्तेवामनोभूदवामनः सर्वदेवमयंरूपंदर्शयामासवैप्रभुः भूःपादौद्यौःशिरश्चास्यचंद्रादित्यौचचक्षुषी
इत्यादिनाविश्वरूपंदर्शयित्वा तस्यविक्रमतोभूमिंचंद्रादित्यौस्तनांतरे नभश्चक्रममाणस्यनाभ्यांतौसमवस्थितौ दिवमाक्रममाणस्यजानुमूलेव्यवस्थि
तावित्यादिनाप्रांशुत्वंहरिवंशेप्रदर्शितं नमोघःकदाचित्पुनरमोघः भक्तकल्पवृक्षत्वात् नतस्यकश्चिद्दयितःसुहृत्समोनवाप्रियोद्वेष्यउपेक्ष्यएववा तथापि
भक्तान्भजतेयथातथासुरद्रुमोयद्वदुपाश्रितोर्थदइतिदशमे अंतःपवित्रत्वाच्छुचिः युधिष्ठिरादीनांसचिवइतिवा पावकेशुचिःमास्यमात्येचात्युपधेइत्यम ॥१२॥

रोक्तेः उप्रधामुत्कोचंमतिक्रांतेअत्युपधे यंमन्यसेमातुलेयंप्रियंमित्रंसुहृत्तमं अकरोःसचिवंदूतंसौहृदादथसारथिमितिप्रथमे गोवर्द्धनोद्धरणादिपुबल वत्त्वादूर्जितः ऊर्जबलप्राणनयोः पारिजातहरणादाविंद्रमतिक्रांतोतींद्रः संगृह्णातिभक्तान्संग्रहः सृज्यतइतिसर्गःकार्यरूपः एकरूपेणजन्मादिरहिततया धृतआत्मायेनधृतात्मा स्वेस्वेअधिकारेप्रजांनियमयतिनियमः अंतर्यच्छतिसर्वांतर्यामित्वाद्यमः ॥३०॥ वेद्यइति अज्ञातत्वेनवेदनार्हत्वाद्वेद्यः विद्याःसर्वा अधीतेवैद्यः सदायोगी सर्वक्रियाकर्तृत्वेपिवस्तुतोऽकर्तृत्वात् वीरान्दैत्यान्हंतीतिवीरहा मायाःभगवद्विद्यायाःधवईशोमाधवः माविद्याचहरेप्रोक्ता तस्याईशोयतोभवान् तस्मान्माधवनामासिधवःस्वामीतिशब्दितइतिहरिवंशे यथामधुपरांप्रीतिमुत्पादयतितथाअयमपीतिभाष्योक्तेर्मधुइत्यविसर्गांतः

वेद्योवैद्यःसदायोगीवीरहामाधवोमधुः॥ अतींद्रियोमहामायोमहोत्साहोमहाबलः॥ ३१ ॥
महाबुद्धिर्महावीर्योमहाशक्तिर्महाद्युतिः॥ अनिर्देश्यवपुःश्रीमानमेयात्मामहाद्रिधृक्॥३२॥

पाठोभाति सविसर्गपाठेतुवसंतइवप्रीत्युत्पादकः इंद्रियागोचरत्वादतींद्रियः मायाविनामपिमोहकारिणीमहतीमायास्यमहामायः ममममायादुरत्ययेतिभ गवदुक्तेः महतीमायाकृपास्येतिभक्ताः मायादंभेकृपायांचेतिविश्वः अहोबकीत्यादिनाऽपराधिष्वपिकृपावगमात् महानुत्साहोऽस्यमहोत्साहः महत्त्व लंपूतनादिवधेबालरूपस्याप्यस्यमहाबलः ॥ ३१ ॥ महाबुद्धिरिति महतीबुद्धिरस्यमहाबुद्धिः महत्अविद्यालक्षणंवीर्यमस्यमहावीर्यः महत्यःशक्त योस्यतत्कार्यानुगुणाःमहाशक्तिः महतीद्युतिःकांतिरस्यमहाद्युतिः इदंतदित्यनिर्देश्यंवपुःस्वरूपमस्यअनिर्देश्यवपुः सर्वबाधावधित्वेनैवतत्सिद्धेः ऐश्व र्यलक्षणाश्रीर्नित्यमस्यास्तीतिश्रीमान् पुनःअमेयःचिदविषयः चिद्रूपत्वात्तादृशआत्मासर्वप्रत्यद्रूपत्वात्अप्रमेयात्मा महांतमद्रिंगोवर्द्धनंमंदरंवागोरक्षणे

अमृतमथनेवाधृतवान्महाद्रिधृक् अत्रश्रीमदाचार्यभाष्येटीकांतरेचधृधातुनाविग्रहंदर्शयित्वाकांतमेवमूलव्याख्यानयोःपठ्यते अभियुक्तपाठोपिकांतत
यैवोपलभ्यतेनतुतांततयातेनेदमार्थिकार्थप्रदर्शनंनतुनाम्निधृधातोःप्रवेशः किंतुमहाद्रौधृष्णोतिप्रगल्भतेमहाद्रिधृक् ञिधृषाप्रागल्भ्येक्विप् क्विन्प्रत्ययस्येति
कुत्वं क्विन्प्रत्ययोयस्मात्क्रियतेकदाचित्तस्यकवर्गोतादेशइतिव्याख्यानेनक्विनंविनापिकुत्वस्वीकारात् *महाद्रिधृषेइतिचतुर्थ्यंतं ॥ ३२ ॥ महेष्वासइति
महान्इष्वासःइषुक्षेपोधनुर्यस्यमहेष्वासः महींबिभर्तिमहीभर्त्ता श्रीर्लक्ष्मीस्तस्यानिवासःश्रीनिवासः सतांसज्जनानांगतिःप्राप्यःसतांगतिः नकेनापिश
त्रुणाक्वापिनिरुद्धःअनिरुद्धः सुरान्आनंदयतीतिसुरानंदः गोविंदः नष्टांवैधरणींपूर्वमविंदद्गुहागतां गोविंदइतितेनाहंदेवैर्वाग्भिरभिष्टुतइतिमोक्षधर्मेषु

महेष्वासोमहीभर्ताश्रीनिवासःसतांगतिः॥ अनिरुद्धःसुरानंदोगोविंदोगोविदांपतिः॥ ३३ ॥
मरीचिर्दमनोहंसःसुपर्णोभुजगोत्तमः ॥ हिरण्यनाभःसुतपाःपद्मनाभःप्रजापतिः ॥ ३४ ॥

गवादिषुविंदेःसंज्ञायामितिसाधुता अहंकिलेंद्रोदेवानांत्वंगवामिंद्रतांगतः गोविंदइतिदेवास्त्वांस्तोष्यंतिभुविशाश्वतमिति गौरेषाभवतोवाणीतांचवेदयतो
भवान् गोविंदस्तुततोदेवमुनिभिःकथ्यतेभवानितिचहरिवंशे एतदनुसारेतुपृषोदरादित्वं गौर्वेदवाणीतद्विदांपतिर्विशेषेणपालकोगोविदांपतिः ॥ ३३ ॥
मरीचिरिति म्रियंतेदुष्टाअनेनमरीचिः मृङ्प्राणत्यागे औणादिरीचिः जिघांसयैनमासाद्यनश्यंत्यग्नौपतंगवदितिदुष्टान्प्रकृत्यदशमोक्तेः दमयतिदुष्टान्द
मनः शुद्धत्वाद्धंसइवहंसः सदसद्विवेचनेक्षीरनीरविवेचकहंसइववा हंतिसंसारबंधंवा भवेद्वर्णागमाद्धंसइत्यभियुक्तोक्तेर्हनधातोरूपं अहंसइतिभावितो

* भाष्यस्वरसात्तुतांतमितिभाति बहुषुस्थलेषुफलितार्थपरतयाव्याख्यानापेक्षयालेखकप्रमादकल्पनस्यायुक्तत्वात्

हंसइतितुश्रौतरीतिः तत्रपरोक्षवादत्वायाकारलोपोद्रष्टव्यः सुपर्णःपक्षीसइवसुपर्णः द्वासुपर्णेतिमंत्रवर्णात् भुजगोत्तमःशेषरूपत्वात् हिरण्यवत्प्रकाशमा नंहिरण्यंब्रह्मांडंनाभावुदरेस्यहिरण्यनाभः हिरण्यगर्भरूपइतिवा सुष्ठुतपोस्यनरनारायणरूपस्यसुतपाः पद्ममिववर्तुलानाभिरस्येति हृदयपद्मस्यना भौमध्येप्रकाशनाद्वापद्मनाभः पृषोदरादित्वात्साधुः प्रजानांप्रद्युम्नादीनांपतिःप्रजापतिःपुनः प्रजास्यात्संततौजनइत्यमरः मरीच्यादिरूपत्वाद्वा ॥ ३४ ॥ अमृत्युरिति नास्यमृत्युर्यतःअमृत्युः सर्वंपश्यतीतिसर्वदृक् हिनस्तीतिसिंहः दंतवक्रादिदुष्टमारकत्वात् सिंहइवपराक्रमशालीवा इतिनाम्नांद्वितीयंशतं ॥ २०० ॥ संधातासंधिकर्त्ता युधिष्ठिरदूतरूपत्वात् तथाप्यसंधिमान् लोकावाच्यतार्थमेवदौत्यकरणात् भक्तांतःकरणेस्थिरत्वात्स्थिरः अजइवअ

अमृत्युःसर्वदृक्सिंहःसंधातासंधिमान्स्थिरः॥अजोदुर्मर्षणःशास्ताविश्रुतात्मासुरारिहा॥ ३५॥
गुरुर्गुरुतमोधामसत्यःसत्यपराक्रमः॥निमिषोऽनिमिषःस्रग्वीवाचस्पतिरुदारधीः ॥ ३६ ॥

जःपुनः अजामेकामित्यादिमंत्रेछागरूपत्वोक्तेः अजतिक्षिपतिशिशुपालवधायचक्रमित्यजइतितुभक्ताःतद्वीभावप्रसंगान्नसम्यक् यत्तुछागवाचिन्य जशब्दइवात्रापिवीभावाभावःसमाधेयइतिनैरुक्तंतद्रूढेषुयुक्तंनयौगिकेषु प्रकृतेतुरूढिमूलकगौणीवृत्तिरितिध्येयं दुःखेनमर्षितुंसोढुंशक्योदुर्मर्षणः दे वैर्मनुष्यैर्गंधर्वैरसुरैरुरगैश्वयः नसोढुंसमरेशक्यस्तंनबुध्यसिकेशवमित्युद्योगपर्वणि शास्तादुष्टानांदंडकरः विश्रुतःशास्त्रप्रसिद्धआत्माविराड्देहोस्यवि श्रुतात्मा सुरारीन्नरकाद्यसुरान्हंतिसुरारिहा ॥ ३५ ॥ गुरुरिति गृणात्युपदिशतिभक्तियोगमुद्धवार्जुनौप्रतिगुरुः उपदेष्टॄणामपिमध्येश्रेष्ठत्वाद्गुरुतमः धत्तेसर्वंधाम परंब्रह्मपरंधामेतिवचनात् सत्यस्त्रिकालाबाध्यः सत्यपराक्रमःअप्रतिहतसामर्थ्यः नितरांमिषतिपश्यतिनिमिषः अतएवानिमिषः अक्षि

पक्ष्मघतोहिकदाचिद्दर्शनमदर्शनंच नास्यतदितिसर्वदादर्शनमेवयुक्तं स्रग्वैजयंतीसास्यास्तीतिस्रग्वी विसृष्टंभगदत्तेनतदस्त्रंसर्वघातिवै उरसाप्रतिजग्राहपार्थंसंछाद्यकेशवः वैजयंत्यभवन्मालातदस्त्रंकेशवोरसीतिद्रोणपर्वणि वाचोवेदरूपायाःपतिर्वाचस्पतिः षष्ठ्याःपतिपुत्रेतिसत्त्वविधानात्षष्ठ्याअलुक् अतएवोदारामहतीबुद्धिरस्यउदारधीः उदारोदातृमहतोरितिविश्वः वाचस्पतिरुदारधीरित्येकंनामेत्याचार्याः वाचस्पतयउद्धारधियेइतिचतुर्थ्यंतं ॥३६॥ अग्रेआदौनीयतेपूज्यतेअग्रणीः धातूनामनेकार्थत्वात् बाहुलकात्कर्मणिक्विप् भविष्यतांवर्ततांचभूतानांचैवभारत सर्वेषामग्रणीर्विष्णुःसेव्यःपूज्यश्चनित्यशइतिमोक्षधर्मेषु ग्रामंमथुरास्थंसमूहंनयतिप्रापयतिद्वारकांग्रामणीःश्रेष्ठोवा ग्रामणीर्नापितेपुंसिश्रेष्ठेग्रामाधिपेत्रिष्वित्यमरः ऋचःसामानियजू

अग्रणीर्ग्रामणीःश्रीमान्न्यायोनेतासमीरणः ॥ सहस्रमूर्धाविश्वात्मासहस्राक्षःसहस्रपात् ॥
॥३७॥ आवर्त्तनोनिवृत्तात्मासंवृतःसंप्रमर्दनः ॥ अहःसंवर्त्तकोवन्हिरनिलोधरणीधरः॥३८॥

षि साहिश्रीरमृतासतामित्युक्ताश्रीरस्यास्तीतिश्रीमान् पुनः नितरामीयतेगम्यतेश्रुतिस्मृतिपुराणतात्पर्यविषयतयान्यायः नयतिप्रापयतिकर्मफलंनेताएषउएववामनीतिश्रुतेः सम्यगीरणंभाषणमस्यसमीरणः सहस्रमूर्द्धाविराड्रूपेण विश्वस्यात्मास्वरूपंविश्वात्मा सर्वाधिष्ठानत्वात् सहस्रंअक्षीणिअस्यसहस्राक्षः सहस्रंपादाअस्यसहस्रपात् संख्यासुपूर्वस्येतिपादशब्दस्यांतलोपः॥३७॥ आवर्त्तनइति आवर्त्ततेधर्मरक्षार्थंपुनःपुनःसंभवतिआवर्त्तनः निवृत्तःपरमवैराग्यशालीआत्माचित्तमस्यनिवृत्तात्मा यस्येंद्रियंविमथितुंकुहकैर्नशेकुरित्युक्तेः अनिवृत्ताःपतिभिर्वार्यमाणाअपिननिवृत्ताव्रजसीमंतिन्यस्तासुआत्माचित्तमस्येतिभक्ताः संवृतोयोगमाययाआच्छादितः नाहंप्रकाशःसर्वस्ययोगमायासमावृतइत्युक्तेः संप्रमर्दयतिदुष्टान्संप्रमर्दनः अहानिसं

वर्तयतिसूर्यरूपेणाहःसंवर्त्तकः वहतिहुतंहविर्देवानग्निरूपेणवन्हिः अग्निमुखावैदेवाइतिश्रुतेः नविद्यतेइलास्यअनिलः कंसंनिर्जित्यउग्रसेनायैवपृथ्वी दानात् रुक्मिणीगतचित्तत्वात्नइलतिस्वपितिवा इलस्वमप्रक्षेपणयोरितिधातुः तथाहमपितच्चित्तोनिद्रांचनलभेनिशीत्युक्तेः धरतिधरोधरण्याधरोध रणीधरोऽनंतरूपेणवराहरूपेणवा ॥ ३८॥ सुप्रसादइति शोभनःसर्वालभ्यतानिवारकःप्रसादोस्यसुप्रसादः किमलभ्यंभगवतिप्रसन्नेश्रीनिकेतनेइत्युक्तेः प्रसन्नोभक्तापराधैरकलुषितआत्माचित्तमस्यप्रसन्नात्मा विश्वस्मिन्धृष्णोतिप्रगल्भतेविश्वधृक् विश्वं*धारणाद्धिविश्वधृगितिभाष्यंतुआर्थिकाभिप्रायेण सर्वेषुपुस्तकेषुशिष्टैश्चविश्वधृगित्येवपाठात् विश्वंभुनक्तिपालयतिविश्वभुक् विविधंभवतिविभुः सत्करोतिपूजयतिधर्मरक्षार्थंगोब्राह्मणान्सत्कर्त्ता सत्कृ

सुप्रसादःप्रसन्नात्माविश्वधृग्विश्वभुग्विभुः ॥ सत्कर्त्तासत्कृतःसाधुर्जन्हुर्नारायणोनरः ॥ ३९ ॥

तःपूजितैरपिपूजितः न्याय्यकर्मभिरेवसाध्नोतिपरकार्यंसाधुः जनान्संहारसमयेजन्हुतेअपनयतिजन्हुः पृषोदरादिः पीत्वागंगांजहौयस्मात्तस्माज्जन्हुरु दीरितइतिपौराणिकाः इदंचसर्वाःशक्तयस्तन्निष्ठाभगवतएवेतिसिद्धांताभिप्रायेणयोज्यं नारायणः नराज्जातानितत्त्वानिनाराणीतिततोविदुः तान्येव वायनंतस्यतेननारायणःस्मृतइतिमहाभारते नराणामयनंयस्मात्तस्मान्नारायणःस्मृतइतिब्रह्मवैवर्त्ते आपोनाराइतिप्रोक्ताआपोवैनरसूनवः अयनंतस्य ताःपूर्वंतेननारायणःस्मृतइतिमानवे नारायणायनमइत्यमुमेवसत्यंसंसारघोरविषसंहरणायमंत्रं शृण्वंतुभव्यमतयोयतयोऽस्तरागाउच्चैस्तरामुपदिशाम्यह मूर्ध्वबाहुरितिनारसिंहे नयतीतिनरःप्रोक्तःपरमात्मासनातनइतिव्यासः ॥ ३९ ॥

*एतादृशभाष्यस्यादर्शनाद्विचारणीयमेतत्

नसंख्येयःकथनीयःशब्दागोचरत्वादसंख्येयः अप्रमेयःफलव्याप्यत्वात्तादृशआत्मायस्यअप्रमेयात्मा विशिष्यतेसर्वेभ्योऽतिरिच्यतेविशिष्टः शिष्टंवेदो
क्तंकर्मकरोतिशिष्टकृत् शिष्टान्करोतिपालयतिवा सामान्यार्थोधातुर्विशेषपरोदृष्टः कुरुकाष्ठानीत्याहरणेयथेत्यपिभाष्यं अशिष्टानपिशिष्टान्करोतीति
तुभक्ताः अपिचेत्सुदुराचारइतिवचनात् शुचिःश्रृंगारइवपुनः शुचिःशुद्धेऽनुपहतेश्रृंगाराषाढयोःसिते ग्रीष्मेहुतवहेपिस्यादुपधाशुद्धमंत्रिणीतिविश्वः सि
॥१५॥ द्धोर्थोर्थमानोस्यसिद्धार्थः सिद्धःसंकल्पोस्यसिद्धसंकल्पः सिद्धिंमुक्तिंददातिसिद्धिदः सिद्धिंत्रैवर्गिकमपिफलमानुषंगिकतयासाधयतिसिद्धिसाधनः॥
॥ ४० ॥ वृषाहीति वृषोधर्मस्तद्रूपंअहःद्वादशाहादिःतदस्यास्तीतिवृषाही वर्षतिकामान्वृषभः वेवेष्टिपादचंक्रमणेनपुनर्विष्णुः वृषोधर्मएवसोपानपर्व

असंख्येयोप्रमेयात्माविशिष्टःशिष्टकृच्छुचिः॥ सिद्धार्थःसिद्धसंकल्पःसिद्धिदःसिद्धिसाधनः॥४०॥
वृषाहीवृषभोविष्णुर्वृषपर्वावृषोदरः॥ वर्धनोवर्धमानश्चविविक्तःश्रुतिसागरः ॥ ४१ ॥

यत्प्राप्तौवृषपर्वा वृषोधर्मउदरेअस्यवृषोदरः दैत्यवधादिकमपिसाधुरक्षणाभिप्रायेणैवभगवताकृतंनतुदैत्यद्वेषेणेतितत्रतत्रप्रतीतेः वर्धयतिभक्तैःकृतमल्पम
पिवर्द्धनः किंचित्करोत्युर्वपियत्स्वदत्तमितिदशमे स्वदत्तंकिंचिदपिउरुकरोतीत्यन्वयः स्वैर्भक्तैर्दत्तं स्वप्रपंचरूपेणवर्द्धतेवर्द्धमानः एवमपिविविक्तःपूतः
विविक्तौपूतविजनावितिकोशात् श्रुतीनांसागरइवश्रुतिसागरः श्रुतिकारणत्वात् श्रुतितात्पर्यविषयत्वाच्च ॥ ४१ ॥ शोभनाभुजाअस्यसुभुजः दुःखेन
हृदयेधार्यतेमुमुक्षुभिर्दुर्धरः प्रशस्तावागस्यास्तीतिवाग्मी महानिंद्रोमहेंद्रः वसुधनंददातीतिवसुदः दीयमानंवस्वपिसएवेतिपुनर्वसुरितिभाष्ये तत्रपुंस्त्व ॥१९॥
मार्षं वसतिनित्यंमथुरायांवसुर्वा नैकानिरूपाण्यस्यनैकरूपः बृहन्महद्वसुधातत्संबिभ्रद्यज्ञवराहरूपमस्यबृहद्रूपः शिपिःपशुस्तत्रयज्ञरूपेणविष्टःप्रतिष्ठि

तः शिपिविष्टः यज्ञोवैविष्णुःपशवःशिपिर्यज्ञएवपशुषुप्रतितिष्ठतीतिश्रुतेः शैत्याच्छयनयोगाच्चशीतिवारिप्रचक्षते तत्पावनादुक्षणाच्चशिपयोरश्मयोमताः तेषुप्रवेशाद्विश्वेशःशिपिविष्टइहोच्यतेइतिपुराणे प्रकाशयतिप्रकाशनः ॥ ४२ ॥ ओजइति ओजःप्राणबलंतेजःप्रतापःद्युतिर्देहकांतिः ताःधरतिओजस्तेजोद्युतिधरः ओजस्तेजइतिनामद्वयं बलंबलवतांचाहंतेजस्तेजस्विनामहमितिभगवद्वचनादित्यपिभाष्ये तन्नविभागसंचारि प्रकाशतइतिप्रकाशस्तादृगात्माविग्रहोस्यप्रकाशात्मा सवित्रादिभिर्विभूतिभिःप्रतापयतिप्रतापनः ऋद्धःपरिपूर्णः स्पष्टंअक्षरंप्रणवरूपंवाचकमस्यस्पष्टाक्षरः मंत्रबोध्यत्वान्मंत्रः

सुभुजोदुर्धरोवाग्मीमहेंद्रोवसुदोवसुः॥ नैकरूपोबृहद्रूपःशिपिविष्टःप्रकाशनः ॥ ४२ ॥
ओजस्तेजोद्युतिधरःप्रकाशात्माप्रतापनः॥ ऋद्धःस्पष्टाक्षरोमंत्रश्चंद्रांशुर्भास्करद्युतिः॥४३॥
अमृतांशूद्भवोभानुःशशबिंदुःसुरेश्वरः॥ औषधंजगतःसेतुःसत्यधर्मपराक्रमः ॥ ४४ ॥

मंत्रयतिवा मंत्रयंतंचकस्मिंश्चिन्मंत्रिभिश्चोद्धवादिभिरितिदशमे तापत्रयार्कसंतप्तानांचंद्रस्यांशुरिवाह्लादकश्चंद्रांशुः भास्करस्येवद्युतिरस्यभास्करद्युतिः ॥ ४३ ॥ अमृतांशूद्भवइति उद्भवत्यस्मादुद्भवः अमृतांशोश्चंद्रस्यउद्भवःसमुद्रमथनेचंद्रोत्पादकःअमृतांशूद्भवः भातिभानुः शशइवबिंदुर्लांछनमस्यशशबिंदुः सइवसर्वौषधिपोषकः पुष्णामिचौषधीःसर्वाःसोमोभूत्वारसात्मकइतिभगवद्वचनात् सुराणांदेवानामीश्वरःसुरेश्वरः संसाररोगनिवर्त्तकत्वादौषधं जगतःसेतुरिवजगतःसेतुः एषसेतुर्विधरणएषांलोकानामसंभेदायेतिश्रुतेः सत्याःधर्माःज्ञानादयोगुणाःपराक्रमश्चास्मिन्सत्यधर्मपराक्रमः ॥ ४४॥

भूतेति भूतभव्यभवन्नाथःस्पष्टार्थः पवनःवायुरिव पवनःपवतामस्मीतिभगवद्वचनात् पावयतीतिपावनः भीषास्माद्वातःपवतेइतिश्रुतेः अनान्प्राणाना त्मत्वेनलातिगृह्णातिअनलःसकलजीवनिकायरूपः जीवपरमात्मनोरभेदात् अनलोग्निरिवेतिवा भक्तानांकामांस्तत्तद्विषयाभिलाषान्स्वस्वरूपप्रदानेन हंतिकामहा कामंप्रद्युम्नंकरोतिकामकृत् कांतःसुंदरः कांतोश्मनिप्रियेचाराविंतिविश्वः काम्यतेमुमुक्षुभिरपिकामः कामान्प्रकर्षेणददातिकामप्रदः प्र कर्षेणदिव्यरूपतयाभवतिप्रादुर्भवतिपुनःप्रभुः तमद्भुतंबालकमंबुजेक्षणमितिदशमोक्तेः ॥ ४५ ॥ युगेति युगादिंयुगारंभंकरोतियुगादिकृत् ॥ ३०० ॥ इतिनाम्नांतृतीयंशतं युगानिकृतादीन्यावर्त्तयतिकालात्मनायुगावर्त्तः नैकमायोबहुमायः इंद्रोमायाभिःपुरुरूपईयतेइतिश्रुतेः प्रतिजीवमविद्याभेदाभ्यु

भूतभव्यभवन्नाथःपवनःपावनोनलः॥कामहाकामकृत्कांतःकामःकामप्रदःप्रभुः॥ ४५॥
युगादिकृद्युगावर्तोनैकमायोमहाशनः॥ अदृश्योव्यक्तरूपश्चसहस्रजिदनंतजित्॥ ४६॥
इष्टोविशिष्टःशिष्टेष्टःशिखंडीनहुषोवृषः॥ क्रोधहाक्रोधकृत्कर्ताविश्वबाहुर्महीधरः॥ ४७॥

पगमात् महदशनमस्यमहाशनः यस्यब्रह्मचक्षत्रंचोभेभवतओदनः मृत्युर्यस्योपसेचनमितिश्रुतेः अदृश्योज्ञानेंद्रियाणां तत्रहेतुः अव्यक्तरूपःसच्चिदानंद रूपःकारणरूपोवा व्यक्तरूपइतिवाच्छेदः तत्रस्थूलरूपोपीत्यर्थः सहस्राणिअसुराणांजयतिसहस्रजित् एवमनंतजित् ॥ ४६ ॥ इष्टइति इष्टःपरमानंद रूपत्वात्सकलेच्छाविषयः सर्वैःपूजितइतिवा इषइच्छायांयजदेवपूजासंगतिकरणदानेष्वित्याभ्यामिष्टशब्दोत्पत्तेः सर्वांतर्यामित्वाद्विशिष्टः शिष्टानांवि दुषामिष्टःशिष्टेष्टः प्रियोहिज्ञानिनोत्यर्थमितिभगवद्वचनात् शिखंडोमयूरपिच्छंसोस्यास्तिगोपवेषधरस्यालंकारशिरोमणित्वेनशिखंडी नह्यतिभूतानि ॥१६॥

मायया नद्बुषः वर्षति कामान्वृषः वृषोहि भगवान्धर्मः स्मृतो लोकेषु भारत नैघंटुकपदाख्याने र्विद्धि मां वृषमित्युते ति महाभारते भक्तानां क्रोधं हंतिक्रोध हा असाधुषु क्रोधं करोति क्रोधकृत् कार्यमात्रस्य कर्तृत्वात्कर्त्ता क्रोधकृतां दैत्यादीनां कर्त्ता छेदक इत्येकं वा नामेति भाष्ये इदं च विभागसंवादि विश्वे चैलो क्यवर्त्तिनो बाहवोऽस्य विश्वबाहुः महीं पूजां धरतीति महीधरः ॥ ४७ ॥ अच्युत इति भक्तेभ्यः कदापि न च्युतः अच्युतः तस्याहं न प्रणश्यामि स च मे न प्रण श्यति इत्युक्तेः तैस्तैर्गुणैः प्रसिद्धत्वात्प्रथितः प्रकर्षेणाणति शब्दायते पुनः प्राणः मेघगंभीरया वाचेति दशमोक्तेः प्राणान्ददाति भक्तरक्षणार्थं पुनः प्राणदः भक्त रक्षणतत्पर इत्यर्थः वासवइंद्रस्तस्यानुजो वासवानुजो वामनावतारः सरसामस्मि सागर इति भगवद्वचनादपांनिधिः अपांनिधये इति चतुर्थ्यंतं अज्ञानस्य स

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ॥ अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ४८ ॥
स्कंदः स्कंदधरो धुर्यो वरदो वायुवाहनः ॥ वासुदेवो बृहद्भानुरादिदेवः पुरंदरः ॥ ४९ ॥

तः प्रपंचोपादानत्वादधिष्ठानं न प्रमतः तत्तत्कालिकतत्तत्कर्मसु अप्रमत्तः स्वे महिम्नि स्थितः प्रतिष्ठितः प्रतिष्ठा संजातास्येति वा ॥ ४८ ॥ स्कंद इति स्कंदति वायुरूपेण शोषयति स्कंदः स्कंदस्य वायोर्धरः स्कंदधरः धुरं जगदुत्पत्त्यादिरूपां वहति धुर्यः वरानभिमतान्पदार्थान्ददाति वरदः वायुवद्वेगवद्वाहनं गरुडरू पमस्य वायुवाहनः वसुदेवापत्यत्वाद्वासुदेवः बृहंतो भानवोऽस्य चंद्रसूर्यरूपस्य बृहद्भानुः आदिः कारणं स द्देवः क्रीडादिमानादिदेवः पुराणि शत्रूणां दारयति पु रंदरः वाचंयमपुरंदरौ चेति साधुः ॥ ४९ ॥ न शोकोऽस्मादशोकः तारयति भक्तांस्तारणः तारयति द्वेष्टॄनपि शिशुपालादींस्तारः पराक्रमवत्त्वाच्छूरः शूर

स्यापत्यंशौरिः व्यवहितमप्यपत्यंभवतीतिसिद्धांतात् जनानामीश्वरोजनेश्वरः अनुकूलएवसर्वेषां आत्मरूपत्वात्अनुकूलः शतमावर्त्ताःप्रादुर्भावाअस्यशतावर्त्तः पद्मंहस्तेस्यास्तीतिपद्मी अपरेणधुनानमब्जमितिश्रीभागवते पद्मनिभेईक्षणेअस्यपद्मनिभेक्षणः ॥ ५० ॥ पद्मस्यनाभिःकर्णिकातरस्थानत्वात्पद्मनाभःपुनः अरविंदेइवाक्षिणीअस्यअरविंदाक्षः पद्मेहृदयपद्मेगर्भइवतन्मध्येउपास्यत्वात्पद्मगर्भः शरीराणिबिभर्त्तिअन्नरूपेणपोषयतिप्राणरूपेणधारयतिवाशरीरभृत् महतीऋद्धिरस्यमहर्द्धिः प्रपंचरूपेणवृद्धत्वात्ऋद्धः वृद्धःपुरातनआत्माअस्यवृद्धात्मा महांतिअक्षाणींद्रियाणियस्यमहाक्षः अ

अशोकस्तारणस्तारःशूरःशौरिर्जनेश्वरः ॥ अनुकूलःशतावर्तःपद्मीपद्मनिभेक्षणः ॥ ५० ॥
पद्मनाभोरविंदाक्षःपद्मगर्भःशरीरभृत् ॥ महर्धिर्ऋद्धोवृद्धात्मामहाक्षोगरुडध्वजः ॥ ५१ ॥
अतुलःशरभोभीमःसमयज्ञोहविर्हरिः ॥ सर्वलक्षणलक्षण्योलक्ष्मीवान्समितिंजयः ॥ ५२ ॥

क्षोबिभीतकतरुःपाशकोक्षोऽक्षमिंद्रियमितिकोशात् गरुडोध्वजेस्यगरुडध्वजः चक्रपाणिवत्परनिपातः गरुडोध्वजोस्येतिवा ॥ ५१ ॥ अतुलइति नतुलाउपमाअस्यअतुलः नत्वत्समोस्त्यभ्यधिकःकुतोन्यइतिभगवद्गीता शीर्यंतेशराणिशरीराणितेषुप्रत्यगात्मतयाभातिशरभः बिभेत्यस्मात्सर्वोभीमः भीमादयोपादानइतिसाधुः समयंजनादीनांजानातीतिसमयज्ञः समंसमत्वंयज्ञोस्यवा समत्वमाराधनमच्युतस्येतिप्रल्हादोक्तेः हविर्हरतिगृह्णातिहविर्हरिः अहंहिसर्वयज्ञानांभोक्तेतिभगवद्वचनात् अथवाहवीरूपत्वाद्धविःतच्चासौहरिःसर्वपापहरत्वाद्धविर्हरिः सर्वैर्लक्षणैःप्रमाणैर्जायमानंलक्षणंज्ञानंतत्रसाधुसर्वलक्षणलक्षण्यः सर्वशास्त्रतात्पर्यविषयत्वात् लक्ष्मीर्नित्यमस्यास्तिलक्ष्मीवान् नित्ययोगेमतुप् समितिंसंग्रामंजयतिसमितिंजयः ॥ ५२ ॥

विक्षरइति विगतःक्षरोनाशोस्माद्विक्षरः रोहितोमत्स्यवपुर्धरत्वात् मार्ग्यतेअन्विष्यतेमार्गः हेतुःनिमित्तोपादानोभयरूपः दमेनप्राप्यादामाउदाराउत्कृ
ष्टामतिर्यद्विषयादामोदरः पृषोदरादिः दमाद्दामोदरंविदुरितिमहाभारते तयोर्मध्यगतंबद्धंदाम्नागाढंतयोदरे ततश्चदामोदरतांसययौदामबंधनादितिब्रह्म
पुराणे सर्वान्सहतेअभिभवतिसहः महींगिरिरूपेणधरतिपुनर्महीधरः महानूभागोभाग्यमस्यमहाभागः वेगोजवस्तद्वानूवेगवान् अनेजदेकंमनसोजवी
यइतिश्रुतेः अमितमशनमस्यसर्वसंहर्तृत्वात्अमिताशनः ॥ ५२ ॥ उद्भवइति उद्गतोभवात्संसारात्उद्भवः क्षोभयतिक्षोभणः प्रकृतिंपुरुषंचैवप्रविश्यात्मे

विक्षरोरोहितोमार्गोहेतुर्दामोदरःसहः ॥ महीधरोमहाभागोवेगवानमिताशनः ॥ ५३ ॥
उद्भवःक्षोभणोदेवःश्रीगर्भःपरमेश्वरः ॥ करणंकारणंकर्त्ताविकर्त्तागहनोगुहः ॥ ५४ ॥
व्यवसायोव्यवस्थानःसंस्थानःस्थानदोध्रुवः ॥ परर्द्धिःपरमस्पष्टस्तुष्टःपुष्टःशुभेक्षणः ॥ ५५ ॥

च्छयाहरिः क्षोभयामासभगवान्सर्वकालेस्वयेच्छयेतिविष्णुपुराणे दीव्यतिक्रीडादिकरोतिदेवः श्रीर्विभूतिर्जगद्रूपागर्भेउदरेस्यश्रीगर्भः परमश्चासावीश
नशीलःपरमेश्वरः साधकतमंकरणं अनन्यथासिद्धनियतपूर्ववर्त्तिकारणं धातूपात्तव्यापाराश्रयःकर्ता विकरोतिविकर्त्ता दुर्विज्ञेयत्वात्गहनः गूहतेसंवृ
णोतिस्वरूपंगुहः ॥ ५४ ॥ व्यवसायइति संविद्रूपत्वाद्व्यवसायः व्यवतिष्ठतेजगदस्मिन्व्यवस्थानः संतिष्ठतेसमाप्तंभवत्यस्मिन्संस्थानः स्थानंवैकुंठादि
भक्तेभ्योददातिस्थानदः नानाकर्मकर्तृत्वेपिस्वरूपतोध्रुवः पराऋद्धिरस्यपरर्द्धिः स्वप्रकाशज्ञानरूपतयापरमस्पष्टः परमानंदत्वात्तुष्टः पूर्णत्वात्पुष्टः शुभंस
र्वेषांसर्वार्थदंईक्षणंयत्कर्तृकंयद्विषयंवाशुभेक्षणः ॥ ५५ ॥

रामइति रमंतेयोगिनोऽस्मिन्रामः रमंतेयोगिनोऽनंतेसत्यानंदेचिदात्मनि इतिरामपदेनासौपरंब्रह्माभिधीयतइतिपुराणे विरमतिजगदस्मिन्विरामः विगतं रजोस्माद्विरजः ब्रह्मविशेष्यं मार्गपंथानमाचष्टेपुनर्मार्गः भक्तैःस्वस्वहृदयेनेतुंशक्योनेयः नयतिभक्तोपहृतमल्पमपिनयः पत्रंपुष्पंफलंतोयमितिभगवद्वचनात् ननयतिबह्वप्यभक्तोपहृतंअनयः भूर्य्यप्यभक्तोपहृतंनमेतोषायकल्पतइतिवचनात् इतिचतुर्थंशतंनाम्नां ॥ ४०० ॥ वीरःयुद्धदानसत्यदयासु शक्तिमतांमध्येश्रेष्ठः धर्ममाचष्टेकरोतिवाधर्मः धर्मवित्सुउत्तमःधर्मविदुत्तमः ॥ ५६ ॥ वैकुंठइति विगताकुंठाप्रतिघातोयेभ्यस्तेषांभक्तानामयंवैकुंठः पूरणात्सदनाच्चैवततोसौपुरुषोमतइत्युद्योगपर्वणि प्रकृष्टःअणःशब्दोवेदरूपोऽस्यप्राणः प्राणंवेदंददातिब्रह्मणेपुनःप्राणदः योब्रह्माणंविदधातिपूर्वंयोवैवेदां

रामोविरामोविरजोमार्गोनेयोनयोनयः॥ वीरःशक्तिमतांश्रेष्ठोधर्मोधर्मविदुत्तमः॥५६॥
वैकुंठःपुरुषःप्राणःप्राणदःप्रणवःपृथुः॥ हिरण्यगर्भःशत्रुघ्नोव्याप्तोवायुरधोक्षजः॥५७॥

श्चप्राहिणोतितस्माइतिश्रुतेः प्रकर्षेणनूयतेस्तूयतेप्रणवः वाच्यवाचकयोरभेदात्प्रणवएववा प्रणमंतीहयंदेवास्तस्मात्प्रणवउच्यते इतिसनत्कुमारवचनानुसारेतुपृषोदरादिः पृथुर्व्यापकःपृथुराजरूपोवा हिरण्यशब्देनस्वर्णवाचिनाप्रशस्योलक्ष्यतेसचासौगर्भोर्भकः पुनर्हिरण्यगर्भःगर्भोभ्रूणेर्भकेकुक्षाविति विश्वः शत्रून्हंतिशत्रुघ्नः व्याप्नोतिव्याप्तः कर्त्तरिक्तः वातिसर्वत्रवायु अधःप्रकाशनासमर्थमक्षजमिंद्रियजज्ञानमस्मिन्अधोक्षजः ॥ ५७ ॥ क्रतुरिति क्रतुर्वसंतः ऋतूनांकुसुमाकरइत्युक्तेः शोभनंदर्शनमस्यसुदर्शनः कालयतिकालः कालःकलयतामहमितिभगवद्वचनं परमेसर्वोत्कृष्टेस्थानेतिष्ठतिपरमेष्ठी तत्पुरुषेकृतीत्यलुक् अंबांबेतिषत्वं परिगृह्यतेस्वीक्रियतेमुमुक्षुभिरन्यदेवतात्यागेनपरिग्रहः उत्उत्कृष्टंचयथातथागिरतिसर्वंउग्रःसदाशिवरूपःसदाशिव

नामावा शिवविष्णवभेदपरवचनचयात् नामानितवगोविंदेत्युक्तवचनाच्च सम्यग्वसतितत्कर्मसुतत्तत्कालरूपेणसंवत्सरः देशःकालस्तथाद्रव्यमित्याद्यु
क्ताक्रतुर्धर्मश्वयन्मयइत्युक्तेः दक्षःअनलसःसत्कर्मसु विश्रामयतिजगद्विश्रामः विश्वस्मिन्दक्षिणःविश्वदक्षिणः दक्षिणःसरलोदारपरच्छंदानुवर्तिष्विति
विश्वः ॥ ५८ ॥ विस्तारइति विस्तार्यतेजगदस्मिन्विस्तारः सर्वत्रस्थितिशीलःस्थावरआकाशादिपदार्थस्तत्रापिस्थाणुःस्थिरःसद्रूपेण स्थावरस्थाणुर
विसर्गमध्यः अतएवस्थावरस्थाणवेइतिचतुर्थ्यंतं अस्तिभातीत्याद्यभियुक्तोक्तेः प्रमाणंप्रमातासत्यवादीवा प्रमाणंनित्यमर्यादासत्यवादिप्रमातृष्विति वि
श्वः बीजमव्ययमित्येकंनाम बीजायाव्ययायेतिचतुर्थ्यंतं अर्थ्यतइत्यर्थः नास्तिअर्थःपरमार्थोस्मादनर्थः प्रपंचस्यावस्तुत्वेनास्यैवपरमार्थत्वात् महा

ऋतुःसुदर्शनःकालःपरमेष्ठीपरिग्रहः॥ उग्रःसंवत्सरोदक्षोविश्रामोविश्वदक्षिणः ॥ ५८ ॥
विस्तारःस्थावरस्थाणुःप्रमाणंबीजमव्ययं॥ अर्थोनर्थोमहाकोशोमहाभोगोमहाधनः॥५९॥
अनिर्विण्णःस्थविष्ठोभूर्धर्मयूपोमहामखः॥ नक्षत्रनेमिर्नक्षत्रीक्षमःक्षामःसमीहनः॥६०॥

न्कोशोस्यमहाकोशः महान्कोशआनंदमयइतिवा महांतःकोशाअस्मिन्वा ब्रह्मणःसर्वाधिष्ठानत्वाभ्युपगमात् महान्भोगःसुखंमहाभोगः भोगःसुखेरुया
दिभृताविव्युक्तेः महांतोऽधनाअस्यमहाधनः निष्किंचनजनप्रियइति तत्रतत्रोक्तेः ॥५९ ॥ अनिर्विण्णइति ननिर्विद्यतेभक्तकार्येषुअनिर्विण्णः अति
शयेनस्थूलःस्थविष्ठः भूःसत्तारूपः नभवतिअभूरितिवा धर्मस्ययूपइवधर्मयूपः यूपेपशुर्बध्यतेयथातथाभवतिधर्मइत्यर्थः भगवदधीनोधर्मइतियावत्
श्रुतिस्मृतीममैवाज्ञेइत्युक्तेः भगवतःसर्वांतर्यामित्वाच्च महान्सर्वमखापेक्षयाअधिकफलदोमखोऽस्यमहामखः नक्षत्राणिनेमयोस्यनक्षत्रनेमिः नक्षत्रनेमिः

शीतांशाविति विश्वः सइवाल्हादकः प्रशस्तंनक्षत्रंजन्मकालेस्यास्तीतिनक्षत्री धर्मप्रधानोनिपुणः सुशीलःप्रियव्रतःशास्त्ररतःसुखाढ्यः स्याद्रोहिणीषुप्र
॥ ११ ॥ वरःकुलस्यपुमान्विवेकीरतलालसश्चेतिज्यौतिषे क्षमतेस्वल्पेनार्चनेनापराधान्क्षमः अपराधसहस्राणिअपराधशतानिच यमेनैकेनदेवेशःक्षमतेप्रणयार्चि
तइतिस्कांदे क्षामःकृशोभक्तदुःखोपस्थितौभक्तेनस्मृतः अधमर्णत्वात् ऋणमेतत्प्रवृद्धंमेल्हृदयान्नापसर्पति यद्गोविंदेतिचुक्रोशकृष्णामांदूरवासिनमित्यु
द्योगपर्वणि सम्यगीहनंचेष्टास्यसमीहनः ॥ ६० ॥ यज्ञइति यज्ञोयज्ञरूपः यज्ञोवैविष्णुरितिश्रुतेः क्रतुर्धर्मश्वयन्मयइतिभागवताच्च इज्यतेपूज्यतेइज्यः
यज्ञइज्यइत्येकंनामेतिभक्ताः यज्ञेराजसूयेइज्यतइतितदर्थः महतीइज्याअस्यमहेज्यः करोतिनानाक्रियाःक्रतुः सततस्त्रायतेसत्रं सत्रयागरूपोवा सतांस

यज्ञइज्योमहेज्यश्वक्रतुःसत्रंसतांगतिः॥ सर्वदर्शीविमुक्तात्मासर्वज्ञोज्ञानमुत्तमं॥ ६१ ॥
सुव्रतःसुमुखःसूक्ष्मःसुघोषःसुखदःसुहृत्॥मनोहरोजितक्रोधोवीरबाहुर्विदारणः॥ ६२ ॥

ज्जनानांगतिःप्राप्यःसतांगतिः सर्वंपश्यतितच्छीलःसर्वदर्शी विशेषेणमुक्तोदोषैःआत्माविमुक्तात्मा सर्वंजानातिविशेषेणसर्वज्ञः ज्ञानमुत्तममित्येकंनामे
तिभाष्ये वृत्तिभिन्नज्ञानरूपइतितदर्थः ॥ ६१ ॥ सुव्रतइति ॥ शोभनंव्रतमस्यसुव्रतः सकृदेवप्रपन्नायतवास्मीतिचयाचते अभयंसर्वभूतेभ्योददाम्येत
द्व्रतंममेतिश्रीरामायणे शोभनंमुखमाननंप्रारंभउपायोवास्यसुमुखः सूक्ष्मःदुर्विज्ञेयः शोभनोघोषोऽवजानेनसुघोषः सुखंददातिभक्तेभ्यःसुखदः सुहृ
त्प्रत्युपकारमनपेक्ष्योपकर्त्ता मोहनीनामपिस्त्रीणांमनोहरतिमनोहरः जितःक्रोधोऽनेनजितक्रोधः वीरास्तत्तत्कर्मसमर्थाबाहवोस्यवीरबाहुः विदारयति ॥ ११ ॥
रिपुवक्षोनृसिंहावतारेविदारणः ॥ ६२ ॥

स्वापनइति स्वमापयतिप्रापयतिभक्तान्स्वापनः सुष्ठुअवशःअपराधीनः स्वेषांवशइतिवा व्याप्नोतिव्यापी नैकेषांअनेकेषांआत्मानैकात्मा सकलजीव बिंबरूपत्वात् नैकानिकर्माणिकरोतिनैककर्मकृत् वत्सान्रातिददातिगोगोपीभ्यःवत्सरः वत्साहरणलीलायांतथादर्शनात् वत्सःस्नेहोभक्तेष्वस्यस्यवत्सलः वत्साःसंतिचारणीयाअस्यवत्सी रत्नानिउत्कृष्टानिवस्तूनिगर्भेअस्यरत्नगर्भः धनस्येश्वरोधनेश्वरः अन्नादोवसुदानइतिश्रुतेः ॥ ६३ ॥ धर्मेति धर्मंगोपाय तिधर्मगुप् धर्मगुपेइतिचतुर्थ्यंतं धर्मंकरोतिधर्मकृत् प्रशस्तोधर्मोस्यस्यधर्मी सत्स्थूलंअसत्सूक्ष्मं क्षरंविनाशि अक्षरंअविनाशि नविज्ञाताज्ञातृरूपःकिं तुज्ञानरूपोऽविज्ञाता अवीनामविरूपमापन्नानांगोपानांज्ञातेतिवा तस्यतत्कर्मविज्ञायेतिदशमोक्तेः सहस्रमंशवःकिरणाअस्यसूर्यरूपस्यसहस्रांशुः वि

स्वापनःस्ववशोव्यापीनैकात्मानैककर्मकृत् ॥ वत्सरोवत्सलोवत्सीरत्नगर्भोधनेश्वरः ॥६३॥
धर्मगुब्धर्मकृद्धर्मीसदसत्क्षरमक्षरं ॥ अविज्ञातासहस्रांशुर्विधाताकृतलक्षणः ॥ ६४ ॥
गभस्तिनेमिःसत्वस्थःसिंहोभूतमहेश्वरः ॥ आदिदेवोमहादेवोदेवेशोदेवभृद्गुरुः ॥ ६५ ॥

शेषेणधत्तेधारयतिपोषयतिवाजगद्विधाता कृतानिपर्याप्तानिलक्षणान्यस्यकृतलक्षणः युगपर्याप्तयोःकृतं गुणैःप्रतीतेतुकृतलक्षणाहतलक्षणाविति चाम रः ॥ ६४ ॥ गभस्तीति गभस्तयोरश्मयोनेमयइवास्यगभस्तिनेमिः ध्यायेत्सदासवितृमंडलमध्यवर्त्तीत्युक्तेः सत्वेतिष्ठतिसत्वस्थः उद्यमस्थासदाल क्ष्मीरितिवत्सत्वगुणेनप्राप्यइत्यर्थः नृशब्दलोपेनसत्यभामाभामेतिवन्नृसिंहः सिंहशब्देनोच्यतइतिभाष्ये सिंहइवविक्रमीवा भूतानांमहस्योत्सवस्येश्वरो भूतमहेश्वरः आदिःकारणभूतोदेवःसकलादिर्बुध्याद्यर्थाश्रयआदिदेवः अतएवमहान्देवोमहादेवः देवानामीशोदेवेशः देवान्बिभर्तिदेवभृन्इंद्रः गृणाति

तत्वंगुरुः देवभूतोगुरुः सुराणांदेवताशक्रःशक्रस्यापिजनार्दनइतिदानधर्मे ॥ ६५ ॥ उत्तरइति उत्तरःसर्वोत्कृष्टः गवांपतिःस्वामीगोपतिः गोपायतिगो
ता ज्ञानेनगम्योनकर्मणाज्ञानगम्यः नकर्मणेतिश्रुतेः पुराअपिभवत्वात्पुरातनः शरीररूपाणिभूतानिबिभर्तिशरीरभूतभृत् यस्यपृथिवीशरीरमित्यादिश्रु
तेः भोक्तापालयिता इतिपंचमंशतंसंपूर्णं ॥ ५०० ॥ कपिःसुग्रीवइंद्रोऽनेनकपींद्रः भूरिभ्योदक्षिणः ॥ ६६ ॥ सोमपइति सोमंपिबतिसोमपः रघुना
थादिरूपेणनानायज्ञकर्तृत्वात् अमृतान्देवान्पातिअमृतपः सोमश्चंद्रइवआल्हादकः उमातसीहैमवतीहरिद्राकीर्त्तिकांतिष्वितिविश्वोक्तेः कीर्त्तियुक्तइ
तिवा पुरून्बहून्जयतिपुरुजित् पुरवोबहवःसत्तमायेनपुरुसत्तमः वीतरागभयक्रोधामन्मयामामुपाश्रिताः बहवोज्ञानतपसापूतामद्भावमागताइतिभगव

उत्तरोगोपतिर्गोप्ताज्ञानगम्यःपुरातनः॥ शरीरभूतभृद्भोक्ताकपींद्रोभूरिदक्षिणः ॥ ६६॥
सोमपोऽमृतपःसोमःपुरुजित्पुरुसत्तमः॥विनयोजयःसत्यसंधोदाशार्हःसात्वतांपतिः॥६७॥

द्वचनं विशिष्टोनयोऽस्यविनयः योवैनकामान्नभयान्नक्रोधान्नार्थकारणात् अन्यायमनुवर्त्तेतस्थिरबुद्धिरलोलुपइतिउद्योगपर्वणि जयतिक्रोधादीन्ज
यः सत्यासंधाप्रतिज्ञास्यसत्यसंधः नानृतंहिवचोविप्रप्रोक्तपूर्वंमयानघ भक्तप्रतिज्ञोऽहमपिलोकानांसंप्लवोभवेइतिहरिवंशे विप्रेतिनारदसंबोधनं दाशो
दानं दाश्दानेइतिधातोः तत्राहोयोग्योदाशार्हः अतःपात्रतरःकोन्यस्त्रिषुलोकेषुविद्यते कृष्णात्कमलपत्राक्षाद्देवदेवाज्जनार्दनादितिहरिवंशे दाशार्हवंशो
द्भवत्वाद्वादाशार्हः सात्वतंनामवैष्णवशास्त्रं सात्वतंपौष्कलंचैवतंत्रेद्वेपांचरात्रिकेइतिब्रह्मांडपुराणात् तदाचक्षतेसात्वतोनारदाद्याः णिजंतात्क्विप् तेषांप
तिर्योगक्षेमनिर्वाहकः सात्वतांपतिः सात्वतांयादवविशेषाणांपतिर्वा पतिर्गतिश्वांधकवृष्णिसात्वतामितिप्रथमेशुकोक्तेः सातिःसुखार्थःसौत्रोहेतमण्यंतस्य

स्मात्शेसातयः वासरूपन्यायेनक्विपिसात्परमात्मासात्वंतोभक्ताइतित्वनुपसर्गाल्लिंपेतिसूत्रेऽभियुक्ताः तसौमत्वर्थइतिभत्वाज्जशूलंन ॥ ६७ ॥ जीवइ ति जीवयतीतिजीवः विनयित्वंविनयिता तस्याःसाक्षीविनयितासाक्षीत्येकं मुक्तिंददातिमुकुंदः पृषोदरादिः अमिताविक्रमाअस्यामितविक्रमः तानि हवाएतानिचत्वार्यंभांसिदेवामनुष्याःपितरोसुराइतिश्रुतेरंभसांदेवादीनांनिधिरिवोपादेयोंऽभोनिधिः अनंतेश्रीमतिबलभद्रेआत्माचित्तमस्यानंतात्मा म होदधौशेतेमहोदधिशयः अंतयतिअंतकः ॥ ६८ ॥ अजइति नजायतेप्रादुर्भवत्यशुद्धहृदेअजः महःपूजातदर्होमहार्हइतिभाष्ये महानर्होवा स्वैर्भ क्तैर्भाव्यश्चिंतनीयःसएवस्वाभाव्यः जिताअमित्राअनेनजितामित्रः प्रकर्षेणमोदतेमोदयतिवाप्रमोदनः आनंदःसुखं एतस्यैवानंदस्यान्यानिभूतानिमा

जीवोविनयितासाक्षीमुकुंदोमितविक्रमः॥ अंभोनिधिरनंतात्मामहोदधिशयोंतकः॥ ६८ ॥
अजोमहार्हःस्वाभाव्योजितामित्रःप्रमोदनः॥ आनंदोनंदनोनंदःसत्यधर्मात्रिविक्रमः॥६९॥
महर्षिःकपिलाचार्यःकृतज्ञोमेदिनीपतिः ॥ त्रिपदस्त्रिदशाध्यक्षोमहाशृंगःकृतांतकृत् ॥ ७० ॥

त्रामुपजीवंतीतिश्रुतेः नंदयतिसमर्धयतिलोकान्नंदनः स्वयंचसमृद्धोत्यतोनंदः सत्योधर्मोऽस्यसत्यधर्मादंभादिरहितः त्रिषुलोकेषुविनाक्रमोगमनमस्य त्रिविक्रमः ॥ ६९ ॥ महर्षिरिति महर्षिःकपिलाचार्यइत्येकंनामेतिभाष्यकृतः महान्नृषिरतींद्रियदर्शीमहर्षिः कपिलश्चासावाचार्यश्चकपिलाचार्यः सि द्धानांकपिलोमुनिरितिगीतासु आचिनोतिचशास्त्रार्थमाचारेस्थापयत्यपि स्वयमाचरतेयस्तुसआचार्यउदाहृतइतिस्मृतिः कृतंजानातीतिकृतज्ञः मेदि न्याःपतिर्मेदिनीपतिः युधिष्ठिरोग्रसेनयोरपिभगवदधीनत्वात् रामावतारेपृथिवीपतित्वाच्च त्रीणिपदान्यस्यत्रिपदः त्रिदशानांदेवानामध्यक्षस्त्रिदशाध्य

क्षः महत्शृंगंप्रभुत्वमुत्कर्षोवाविषाणंवामत्स्यावतारेऽस्यमहाशृंगः शृंगंप्रभुत्वेशिखरेचिन्हेक्रीडांबुयंत्रके विषाणोत्कर्षयोश्चापिइतिविश्वः कृतांतंसिद्धांतंकरोतीतिकृतांतकृत् यमंअकुशलंकर्मवाकृंततीतितथा कृतांतोयमसिद्धांतदैवाकुशलकर्मस्वित्यमरः ॥ ७० ॥ महावराहइति महान्लोकोत्तरोवराहो महावराहः गाःविंदतिलभतेचारयितुंगोविंदः शाश्वतत्वादनंतश्चगोविंदोवेदनाद्वामित्युद्योगपर्वणि सेनयासुष्ठुयातिसुषेणः सत्यापेतिणिजंतात्पचाद्यच् उपसर्गात्सुनोतीतिषत्वं शोभनासेनास्यवा एतिसंज्ञायामितिषत्वं कनकांगदंस्वर्णमयंचंपकमयंवाकेयूरंतदस्यास्तीतिकनकांगदी कनकंचंपकेस्वर्णइति विश्वः गूहितुंसंवरीतुंयोग्योगुह्यः परमरहस्यरूपत्वात् शंसिदुहिगुहिभ्यःक्यब्वक्तव्यइतिक्यप् गूढाभिप्रायत्वाद्गभीरः नह्यस्यकर्हिचिदितिप्रथमस्कंधोक्तेः

महावराहोगोविंदःसुषेणःकनकांगदी ॥ गुह्योगभीरोगहनोगुप्तश्चक्रगदाधरः॥ ७१ ॥
वेधाःस्वांगोजितःकृष्णोदृढःसंकर्षणोच्युतः॥ वरुणोवारुणोवृक्षःपुष्कराक्षोमहामनाः॥ ७२ ॥

गहनोदुष्प्रवेशोऽभक्तैः अवस्थात्रयभावसाक्षित्वादगहनोवा इंद्रियैरग्राह्यत्वाद्गुप्तः मायाह्येषामयासृष्टायन्मांपश्यसिनारदेत्युक्तेः चक्रगदेसुदर्शनकौमोदक्यौतयोर्धरःचक्रगदाधरः ॥ ७१ ॥ वेधाइति विधत्तेभक्तानांहितंवेधाइतिभाष्यकृतः इदंचार्थिकंनत्वेतद्धाजोरूपं पृषोदरादित्वकल्पनापत्तेः रूपंतुविधविधानेइत्यस्मादसुनिबोध्यं स्वेभक्ताअंगानीवास्यस्वांगः शत्रुभिर्नजितःअजितः भक्तैर्जितोवा कृष्णोवर्णश्चमेयस्मात्तस्मात्कृष्णोहमर्जुनेतिमोक्षधर्मोक्तेःपुनःकृष्णः समर्थत्वाद्दृढः दृढःस्थूलेभृशेशक्तेप्रगाढेपिदृढोमतइतिविश्वः संकर्षतिभक्तदुःखंसंकर्षणः नच्यवंतेपियद्भक्त्यामहत्यांप्रलयापदि अतोऽच्युतःस्मृतोलोकेसएकःसर्वगोऽव्ययइतिकाशीखंडे संकर्षणोऽच्युतइत्येकंनामेतिभाष्ये वृणुतेस्वंप्रापयितुंवरुणः नोयमात्माप्रवचनेनलभ्योनचेज्यया

नबहुनाश्रुतेन यमेवैषवृणुतेतेनलभ्यस्तस्यैवआत्मावृणुतेतनूंस्वामितिश्रुतेः वरुणपदेनवरुणलोकोलक्ष्यतेततआगतोवारुणः एवंप्रसादितःकृष्णोभगवानी श्वरेश्वरः आदायागात्स्वपितरंबंधूनांचावहन्मुदमितिवरुणलोकेगत्वानंदमादायततआगमनस्यदशमेउक्तेः वृश्चतिसंसारंवृक्षः भक्तकल्पवृक्षोवा व्योमपु ष्करमंबरमितिश्लोकेपुष्कंजलंरातिददातिपुष्करमितिक्षीरस्वाम्युक्तेः पुष्कशब्दस्यजलवाचित्वावगमेप्रकृतेपि पुष्करेपुष्कंजलंतद्रातउत्सृजतइतिव्युत्प त्त्यासजलेसाश्रुणीइतियावत् तादृशेअक्षिणीअस्यपुनःपुष्कराक्षः गोप्याददेत्वयिकृतागसिदामतावद्यातेदशाश्रुकलिलांजनसंभ्रमाक्षं वक्रंनिनीयभयभा वनयास्थितस्यसामांविमोहयतिभीरपियद्बिभेतीतिकुंत्युक्तेः एवमपिमहदुन्नतंमनोयस्यमहामनाः ॥ ७२ ॥ भगवानिति ऐश्वर्यस्यसमग्रस्यधर्मस्ययश सःश्रियः ज्ञानवैराग्ययोश्चैवषण्णांभगइतींगना भगोनित्योस्त्यस्यभगवान् उत्पत्तिंप्रलयंचैवभूतानामागतिंगतिं वेत्तिविद्यामविद्यांचसवाच्योभगवानि

भगवान्भगहानंदीवनमालीहलायुधः॥ आदित्योज्योतिरादित्यःसहिष्णुर्गतिसत्तमः॥ ७३॥

तिपुराणे भगंऐश्वर्यंसंहारकालेहंतिभगहा आनंदःस्वरूपसुखंनित्यमस्यास्तिआनंदी भक्तास्तुभगंदेवविशेषंनेत्रहरणेनहंतिक्लेशयतिभगहाश्रीमहादेवस्त मानंदयतीतिभगहानंदीत्याहुः कदंबकुसुमोद्भासिवनमालाविराजितइत्युक्तेर्वनमाली व्रीह्यादित्वादिनिः आपादलंबिनीमालावनमालेतिकीर्त्यते हला निशत्रुविलेखनकर्तॄणिआयुधानिअस्यहलायुधः हलविलेखनइतिधातुपाठात् अदितेरपत्यमादित्यः सूर्यइवपुनः ज्योतिषांआदित्यइवज्योतिरादि त्यः प्रतापेनचदीप्तेनदीप्त्यापूर्णतयापिच उत्तमस्त्वंहिमर्त्त्येषुदेवेष्विवदिवाकरइतिहरिवंशे आदित्यादपिउज्ज्योतिःआदित्योज्ज्योतिः कोटिसूर्याधिक ज्योतिःकोटिचंद्राधिकद्युतिः कोटिकंदर्पलावण्यःप्राणकोट्यधिकप्रियइतिपुराणादितितुभक्ताः शिशुपालस्यापराधान्सहतेसहिष्णुःपुनः अपराधशतं

क्षाम्यंमयाह्यस्यपितृष्वसः पुत्रस्यतेवधार्हस्यमात्वंशोकेमनःकृथाइतिसभापर्वणि गतिषुआश्रयणीयेषुसत्तमोगतिसत्तमः ॥ ७३ ॥ सुधन्वेति शोभनं धनुःशार्ङ्गमस्यसुधन्वा खंडयतीतिखंडःसपरशुरस्यजामदग्न्याकृतेःखंडपरशुः अखंडपरशुरितिवा आसमंतात्खंडपरशुर्महादेवोस्यऐश्वर्यमाधुर्यवशात्वा दितितुभक्ताः मल्लानामशनिरित्याद्युक्तेर्भक्तानांसौम्योपिविरोधिनांदारुणः द्रविणंवित्तंप्रददातिभक्तेभ्योद्रविणप्रदः द्रविणंकांचनेवित्तेद्रविणंचपराक्रमेइतिविश्वः दिवंस्पृशतिदिवस्पृक् वामनावतारेतथादर्शनात् सर्वदर्शिव्यासरूपत्वात् सर्वदृग्व्यासः कृष्णद्वैपायनंव्यासंविद्धिनारायणंप्रभुं कोह्यन्यःपुंडरीकाक्षान्महाभारतकृद्भवेदित्युक्तेः वाचस्पतिरयोनिजइत्येकंनामेतिभाष्ये वाचोविद्यायाःपतिःजनन्यांनजायतेइतिच ॥ ७४ ॥ त्रिसामेति वेदव्रतस

सुधन्वाखंडपरशुर्दारुणोद्रविणप्रदः॥ दिवस्पृक्सर्वदृग्व्यासोवाचस्पतिरयोनिजः ॥ ७४ ॥
त्रिसामासामगःसामनिर्वाणंभेषजंभिषक्॥ संन्यासकृच्छमःशांतोनिष्ठाशांतिःपरायणं॥७५॥

माख्याता नित्रीणिसामानिप्रतिपादकान्यस्य त्रिसामा सामगायतिब्रह्मविद्रूपेणसामगः एतत्सामगायन्नास्तइत्यादिश्रुतेः वेदानांसामवेदोस्मीतिवचनात्साम परमानंदरूपत्वान्निर्वाणं अच्युतानंतगोविंदेत्याद्युक्तेर्भैषजं संसारतारकविद्योपदेशित्वाद्भिषक् भिषक्तमंत्वाभिषजांश्रृणोमीत्युक्तेः संन्यासंमोक्षार्थंकरोतिसंन्यासकृत् शममाचष्टेसंन्यासिभ्यः यतीनांप्रशमोधर्मोनियमोवनवासिनां दानमेवगृहस्थानांशुश्रूषाब्रह्मचारिणामित्युक्तस्मृतिकर्तृरूपेणशमः सुखेष्वसक्तत्वात्शांतः प्रलयेनितरांतिष्ठंतिभूतान्यत्रनिष्ठा शांतिरविद्यानिवृत्तिः तस्याब्रह्मरूपत्वव्यवस्थापनात् परंपुनरावृत्तिरहितमयनंस्थानंपरायणं पुल्लिंगपाठेबहुव्रीहिः ॥ ७५ ॥

शुभांगइति शुभान्यंगानिअस्यशुभांगः शांतिरागद्वेषनिवृत्तिंददातिशांतिदः सृजतिसकलंस्रष्टा कौमोदतेकुमुदः कौपृथ्व्यांवलतिचलतेकुवलंजलंतत्र शेतेकुवलेशयः शयवासवासिष्वित्यलुक् गोभ्योहितोगोहितः गोर्भूम्यादेःपतिर्गोपतिः गोपायतिभक्तान्गोप्तापुनः वृषभोधर्मःसएवाक्षिअस्यवृषभाक्षः धर्माधर्मानुसारेणैवविषमस्रष्टृत्वात् वृषोधर्मःप्रियोस्यवृषप्रियः ॥७६॥ अनिवर्तीति ननिवर्त्ततेकर्मणोलोकसंग्रहार्थीअनिवर्त्ती वर्तएवचकर्मणीत्युक्तेः निवृत्तोविषयेभ्यआत्माचित्तमस्यनिवृत्तात्मा संक्षिपतिवेदार्थंगीतायांसंक्षेप्ता सर्ववेदमयीगीतेत्युक्तेः क्षेमंकरोतिक्षेमकृत् स्मृतिमात्रेणपावनत्वात्पुनः शिवः इतिषष्ठंशतं ॥ ६०० ॥ श्रीवत्सस्तदाख्यंचिन्हंवक्षस्यस्यश्रीवत्सवक्षाः श्रीर्वसत्यस्मिन्श्रीवासः श्रियःपतिःश्रीपतिः श्रीमतांविरंच्यादीनामपिव

शुभांगःशांतिदःस्रष्टाकुमुदःकुवलेशयः॥ गोहितोगोपतिर्गोप्तावृषभाक्षोवृषप्रियः ॥ ७६ ॥

अनिवर्त्तीनिवृत्तात्मासंक्षेप्ताक्षेमकृच्छिवः॥श्रीवत्सवक्षाःश्रीवासःश्रीपतिःश्रीमतांवरः॥ ७७॥

श्रीदःश्रीशःश्रीनिवासःश्रीनिधिःश्रीविभावनः॥श्रीधरःश्रीकरःश्रेयःश्रीमाँल्लोकत्रयाश्रयः॥ ७८॥

रःश्रीमतांवरः ॥ ७७ ॥ श्रीदइति ऋचःसामानिजुंषिसाहिश्रीरमृतासतामितिश्रुतांश्रियंददातिश्रीदः तस्याएवेशःश्रीशः श्रियःशोभायानिवासःपुनः श्रीनिवासः श्रियोनिधीयंतेअस्मिन्श्रीनिधिः श्रियःकर्मानुरूपेणविभावयतिददातिश्रीविभावनः श्रियोलक्ष्म्याःधरःश्रीधरः स्मरतामपिश्रियःकरःश्रीकरः अतिशयेनप्रशंस्यंनिरुपाधिपरमप्रेमगोचरत्वात्सुखंतच्चपरमात्मैवेतिसिद्धांतात्श्रेयः श्रीरस्यास्तिपुनःश्रीमान् उपकरणवेषरचनाविधासुचश्रीरितिप्रथिता लक्ष्मीत्रिवर्गसंपद्विभूतिमतिभारतीषुशोभायामितिकोशः लोकत्रयस्याश्रयोलोकत्रयाश्रयः ॥ ७८ ॥

स्वक्षइति शोभनानिअक्षाणिइंद्रियाण्यस्यस्वक्षः एवंस्वंगः शतमपरिमिताआनंदाअस्यशतानंदः नंदयतिनंदिः सर्वधातुभ्यइः ज्योतिर्गणानामीश्वरो ज्योतिर्गणेश्वरः विजितआत्माअनेनविजितात्मा नकेनापिविधेयःकार्यआत्माविग्रहोस्यअविधेयात्मा विधेयोविनयग्राहीत्यमरः विधेयआत्माचित्तं

॥ २३ ॥ देहोवास्यविधेयात्मावा सतीकीर्त्तिरस्यसत्कीर्त्तिः छिन्नाःसंशयाअस्यछिन्नसंशयः ॥ ७९ ॥ उदीर्णइति उदीर्णःसर्वतोधिकः सर्वतश्चक्षुरस्यसर्वतश्चक्षुः नास्तिईशोऽस्यअनीशः नतस्येशेकश्चनेतिश्रुतेः शाश्वतस्थिरइत्येकंनामेतिभाष्ये सकलकालदेशव्यापीतितस्यार्थः शाश्वतस्थिरायेतिचतुर्थ्यंतं शाश्वतायस्थिरायेतिवा सविसर्गपाठेखर्परेशरीतिवैकल्पिकविसर्गलोपविधानात् चतुरमेवभुविशेतेसीतान्वेषणेसागरतीरेभूशयः क्वचित्पल्लवतल्पेषुनि

स्वक्षःस्वंगःशतानंदोनंदिर्ज्योतिर्गणेश्वरः॥विजितात्माऽविधेयात्मासत्कीर्तिश्छिन्नसंशयः॥७९॥
उदीर्णःसर्वतश्चक्षुरनीशःशाश्वतस्थिरः॥ भूशयोभूषणोभूतिर्विशोकःशोकनाशनः॥ ८० ॥
अर्चिष्मानर्चितःकुंभोविशुद्धात्माविशोधनः॥अनिरुद्धोऽप्रतिरथःप्रद्युम्नोऽमितविक्रमः॥८१॥

युद्धश्रमकर्शितः वृक्षमूलाश्रयःशेतेगोपोत्संगोपबर्हणइतिदशमोक्तेः श्रीकृष्णावतारएवेदंनामेतितुभक्ताः भूषयतिसर्वंभूषणः नंद्यादिः भूतिःसत्ता विगतः शोकोस्माद्विशोकः शोकनाशनःस्पष्टः ॥ ८० ॥ अर्चींषिसंत्यस्यसूर्यादौविद्यमामानिअर्चिष्मान् यदादित्यगतंतेजइत्यादिभगवद्वचनात् अर्चितःपूजितःसर्वैः कुंभवदस्मिन्सर्वंप्रतिष्ठितमितिभाष्ये कुंभान्यस्यसंतिकुंभोऽर्शआदिः क्वचिद्बिल्वैःक्वचित्कुंभैःक्वचामलकमुष्टिभिरित्युक्त्वा क्रीडाभिश्चेरतुर्वनइतिदशमोक्तेरितिभक्ताः विशुद्धआत्मास्यविशुद्धात्मा विशेषेणशोधयतिपापंविशोधनः ननिरुद्धःक्वचित्पुनरनिरुद्धः नास्तिप्रतिरथःप्रतियोद्धाअस्यअ

प्रतिरथः यःपुनःप्रतिमानेनत्रीन्लोकानतिरिच्यते तंकृष्णंपुंडरीकाक्षंकोनुयुध्येतबुद्धिमानित्युद्योगपर्वणि प्रकृष्टंद्युम्नंधनमस्यप्रद्युम्नः अमितोविक्रमो स्यामितविक्रमः ॥ ८१ ॥ कालेति कालनेमिनामानमसुरंनिहतवान्कालनेमिनिहा कालनेमिरिहकंसस्तदवतारत्वादितितुभक्ताः विगरुद्वईरयनिपुन वीरः शौर्ययुक्तत्वात् शूरस्यवसुदेवस्यापत्यंशौरिःपुनः शूराणामपिजनानामीष्टेशूरजनेश्वरः त्र्यवयवोलोकस्त्रिलोकस्तस्यात्माअधिष्ठानंत्रिलोकात्मा एवंत्रिलोकस्येशस्त्रिलोकेशः प्रशस्ताःकेशाःसूर्यादिसंक्रांताअंशवोस्यकेशवः केशाद्वोन्यतरस्यामितिवः अंशवोयेप्रकाशंतेममैतेकेशसंज्ञिताः सर्वज्ञाः केशवंतस्मान्मामाहुर्द्विजसत्तमाइतिमहाभारते कोब्रह्मेतिसमाख्यातईशोहंसर्वदेहिनां आवांतवांशसंभूतौतस्मात्केशवनामवानितिहरिवंशे केशीवातोग

कालनेमिनिहावीरःशौरिःशूरजनेश्वरः॥ त्रिलोकात्मात्रिलोकेशःकेशवःकेशिहाहरिः॥ ८२ ॥

कामदेवःकामपालःकामीकांतःकृतागमः॥ अनिर्देश्यवपुर्विष्णुर्वीरोनंतोधनंजयः ॥ ८३ ॥

च्छतोस्मात्सर्वधातुभ्योबाहुलकादपादाने केशिनंहतवान्केशिहा हरतिकैरपिस्मृतःपापानिहरिः ॥ ८२ ॥ कामेति काम्यतइतिकामःसचासौदेवश्चकाम देवः कामान्भक्तानांपालयतिकामपालः एवमपिकामोभिलोषोस्त्यस्यकामी तदहंभक्त्युपहृतमित्याद्युक्तेः कस्यब्रह्मणोप्यंतोस्मात्कांतः कृतआगमोवे दोयेनकृतागमः अनिर्देश्यंजात्यादिरहितत्वादिदंतदित्यशक्यकथनंवपुः शुद्धस्वरूपमस्यअनिर्देश्यवपुः यतोवाचोनिवर्त्ततेइत्यादिश्रुतेः वेवेष्टिकांत्याद्या वापृथिव्यौपुनर्विष्णुः व्याप्येमेरोदसीपार्थकांतिरभ्यधिकास्थिता क्रमेणचाप्यहंपार्थविष्णुरित्यभिसंहितइतिमहाभारते पुनर्वीरश्रेष्ठःसुभटोवा वीरश्च सुभटेश्रेष्ठइतिविश्वः गंधर्वाप्सरसोयक्षाःकिंनरोरगचारणाः नांतंगुणानांगच्छंतितेनानंतोयमुच्यतइतिविष्णुपुराणे धनंजयतीतिधनंजयोऽर्जुनःसएवाय मितितथा पांडवानांधनंजयइत्युक्तेः ॥ ८३ ॥

ब्रह्मण्यइति ब्रह्मणेतपःप्रभृतयेहितोब्रह्मण्यः ब्रह्मवेदंकरोतिब्रह्मकृत् ब्रह्मासृष्टिसमये सृष्ट्यादयेहरिविरिंचिहरेतिसंज्ञाधत्तइत्युक्तेः एवमपिब्रह्म प्रत्यस्तमितभेदंयत्सत्तामात्रमगोचरः वचसामात्मसंवेद्यंतज्ज्ञानंब्रह्मसंज्ञितमितिपुराणे ब्रह्मतपोविवर्द्धयतिब्रह्मविवर्द्धनः सोतप्यतेत्युक्तेः ब्रह्मवेदंतत्त्वंवावेत्तिब्रह्मवित् ब्रह्मणोवेदस्यप्रवर्तकोब्राह्मणःशेषेऽणू स्वाध्यायप्रवचनेएवेतिनाकोमौद्गल्यइत्यादिश्रुतिवचनेनवेदप्रवर्त्तकत्वावगमात् ब्रह्मतत्त्वमस्यास्तिब्रह्मी व्रीह्यादित्वादिनिः ब्रह्मज्ञोजीवरूपेण तदात्मानमेवावेदहंब्रह्मास्मीतिश्रुतेः ब्राह्मणाःप्रियायस्यब्राह्मणप्रियः घ्नंतंशपंतंपरुषंवदंतंयोब्राह्मणंनप्रणमेद्यथाहं सपापकृद्ब्रह्मदवाग्निदग्धोवध्यश्चदंड्यश्चनचास्मदीयइत्युक्तेः ॥ ८४ ॥ महाक्रमइति महांतःक्रमाःपादविक्षेपाअस्यमहाक्रमः महांतिकर्माण्यस्यमहाकर्मा महत्तेजोस्यमहातेजाः येनसूर्यस्तपतीतिश्रुतेः महांश्चासावुरगश्चमहोरगः सर्पाणामस्मिवासुकिरितिगीतासु यथाश्वमेधःक्रतुराडित्युक्तो

ब्रह्मण्योब्रह्मकृद्ब्रह्माब्रह्मब्रह्मविवर्धनः ॥ ब्रह्मविद्ब्राह्मणोब्रह्मीब्रह्मज्ञोब्राह्मणप्रियः ॥ ८४ ॥

महाक्रमोमहाकर्मामहातेजामहोरगः ॥ महाक्रतुर्महायज्वामहायज्ञोमहाहविः ॥ ८५ ॥

श्वमेधोपिसएवेतिमहाक्रतुः क्रतुर्धर्मश्चयन्मयइत्युक्तेः महान्यज्वायागंकृतवाँल्लोकसंग्रहार्थंमहायज्वा महान्यज्ञोजपयज्ञोमहायज्ञः यज्ञानांजपयज्ञोस्मीतिभगवदुक्तेः महत्हविर्महाहविः ब्रह्मार्पणमित्याद्युक्तेः ॥ ८५ ॥ स्तव्यइति स्तव्यःस्तुतियोग्यः स्तवःप्रियोस्यस्तवप्रियः स्तूयतेनेनस्तोत्रं गुणप्रतिपादकशब्दरूपइत्यर्थः त्वंस्त्रीत्वंपुमानसित्वंकुमारउतवाकुमारी त्वंजीर्णोदंडेनवंचसित्वंजातोभवसिविश्वतोमुखइतिश्रुतेः स्तुतिर्गुणकीर्त्तनक्रिया स्तोतास्तुतिकर्ता रणःप्रियोऽस्यकौरवपांडवानांनतुसंधिकरणप्रियः दुर्योधनंसौबलंचकर्णंदुःशासनंतथा अघातयित्वापांचालिनशांतिर्विद्यतेममेतिश्रीकृ

ष्णोक्तेः अनंतकल्याणगुणत्वात्पूर्णः भक्तानांकामपूरणशीलत्वात्पूरयिता पुण्यश्चारुः पुण्यंतुचार्वपीत्यमरः पुण्याकीर्त्तिरस्यपुण्यकीर्त्तिः आंतराबाह्यावा आमयानसंत्यस्यअनामयः ॥ ८६ ॥ मनोजवइति मनसोजवइवजवोस्यमनोजवः अनेजदेकंमनसोजवीयइतिश्रुतेः तीर्थंस्वस्पर्शेनकरोतीतितीर्थक रः सुव्हत्तमंज्ञातिमनन्यदैवतंदोर्भ्यांबृहद्भ्यांपरिरप्स्यतेथमां आत्माहितीर्थीक्रियतेतदेवमेबंधश्चकर्मात्मकउच्छ्वसित्यतइतिदशमे वसुसुवर्णंरेतोस्यवसुरेताः अपएवससर्जादौतासुवीर्यमवासृजत् तदंडमभवद्धैमंसहस्रांशुसमप्रभमितिव्यासः वसूनिप्रकर्षेणद्यतिवसुप्रदः यस्याहमनुगृह्णामिहरिष्येतद्धनंशनैरिति

स्तव्यःस्तवप्रियःस्तोत्रंस्तुतिःस्तोतारणप्रियः॥ पूर्णःपूरयितापुण्यःपुण्यकीर्तिरनामयः॥ ८६॥
मनोजवस्तीर्थकरोवसुरेतावसुप्रदः ॥ वसुप्रदोवासुदेवोवसुर्वसुमनाहविः ॥ ८७ ॥
सद्गतिःसत्कृतिःसत्तासद्भूतिःसत्परायणः॥ शूरसेनोयदुश्रेष्ठःसन्निवासःसुयामुनः ॥ ८८ ॥

दशमे वसूनिधनानिप्रकर्षेणददातिपुनर्वसुप्रदः वसुदेवस्यापत्यंवासुदेवः माययात्मनःस्वरूपंछादयतिपुनर्वसुः वसत्यविशेषेणसर्वत्रवसु तादृङ्मनोऽस्यपु नर्वसुमनाः ब्रह्मार्पणंब्रह्महविरित्युक्तेर्हविः ॥ ८७ ॥ सद्गतिरिति सतांअस्तिब्रह्मेतिचेद्वेदसंतमेनंततोविदुरित्युक्तानांगतिःप्राप्यःसद्गतिः सतीकृतिरस्यस त्कृतिः इतिसप्तमंशतं ॥ ७०० ॥ सत्तासर्वत्रप्रतीयमानाधिष्ठानरूपा सतांभूतिरस्मात्सद्भूतिः संतोभक्ताःपरायणमभीष्टमस्यसत्परायणः परायणमभी ष्टेस्यात्तत्पराश्रययोरपीतिविश्वः शूरासेनास्यहनुमत्प्रमुखाशूरसेनः यदुषुश्रेष्ठोयदुश्रेष्ठः सतांनिवासःसन्निवासः शोभनायामुनायमुनातीरोद्भवागोपा लाःपरिवेष्टारोऽस्यसुयामुनइतिभाष्यकृतः यमुनायाअदूरभवोदेशोवृंदावनादिरूपःसशोभनोनेनयामुनंजलंशोभनमनेनवेतितुभक्ताः ॥ ८८ ॥

भूतेति भूतान्यावसंत्यत्र भूतावासः वसुदेवेविशुद्धसत्वेईयतेवासुदेवः पुनः शेषेण् सत्वंविशुद्धंवसुदेवशब्दितंयदीयतेतत्रपुमानपावृतः सत्वेचतस्मिन्भगवान्वासुदेवोह्यधोक्षजोमेमनसाविधीयतइतिचतुर्थेशिवोक्तेः सर्वेऽसवःप्राणोपाधिकाजीवास्तेषांनिलयःसर्वासुनिलयः सतासोम्यतदासंपन्नोभवतीतिश्रुतेः अलंपर्याप्तिःशक्तिसंपदांनास्यविद्यतेइत्यनलइतिभाष्ये एवंत्वनलमितिभवेन्नत्वनलइतिचेत्सत्यं भाष्यकारोक्तेरेवमभिप्रायत्वात् अलभूषणादावितिधातोः पुंसिसंज्ञायांघइतिघेअलःसनविद्यतेस्येति अलमित्यव्ययग्रहणेनविग्रहणंतुप्रसिद्धतरत्वादिति भक्तास्तुनलइतिच्छित्वा नलतिपारिजातादिपुष्पैःस्वभावेनचसौगंध्यंबिभर्त्तिनलः णलबंधनइतिधातुपाठात् सपारिजातपुष्पस्यसंसर्गादनुवासितः बभारभगवान्गंधंमानुषंदुर्लभमितिहरिवंशोक्तेः

भूतावासोवासुदेवःसर्वासुनिलयोनलः ॥ दर्पहादर्पदोदृप्तोदुर्धरोथापराजितः ॥ ८९ ॥
विश्वमूर्त्तिर्महामूर्त्तिर्दीप्तमूर्त्तिरमूर्तिमान् ॥ अनेकमूर्तिरव्यक्तःशतमूर्त्तिःशताननः ॥ ९० ॥

अत्रानुवासितइत्युक्त्यापूर्वमेववासितोपीत्यर्थात्स्वाभाविकमपिसौगंध्यमुक्तमिति विरोधिनांदर्पंहंतीतिदर्पहा अभक्तानांदर्पंददातीतिदर्पदः निजानंदानुभवित्वाद्दृप्तः दुःखेनहृदयेधार्यतेशुद्धरूपोदुर्धरः क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसामित्युक्तेः अथेतिग्रंथमध्येमंगलं अपराजितःस्पष्टः ॥ ८९ ॥ विश्वेति विश्वंमूर्त्तिरस्यविश्वमूर्त्तिः महतीसच्चिदानंदलक्षणापिमूर्त्तिरस्यमहामूर्त्तिः दीप्ताज्ञानमयीमूर्त्तिरस्यदीप्तमूर्त्तिः एवमपिनमूर्तिमानमूर्तिमान् नरूपमस्येहतथोपलभ्यतइतिश्रुतेः अनेकाःभक्तानुग्रहार्थंमूर्तयोस्यानेकमूर्त्तिः एवमपीत्थमयमितिज्ञातुमशक्यत्वादव्यक्तः शतमसंख्याताभूर्त्तयोस्यशतमूर्त्तिः अतएवशताननः ॥ ९० ॥

एकोनैकइति परमार्थतःसजातीयविजातीयस्वगतभेदरहितत्वादेकः एवमपिमाययाबहुरूपत्वान्नैकः अत्रएकायनैकायेतिचतुर्थ्यंतं सूयतेसोमोत्रेतिसवः क्रतुर्धर्मश्वयन्मयइत्युक्तेः कशब्दःसुखवाचकस्तेनस्तूयतेकइति कंब्रह्मेतिश्रुतेरितिभाष्यकृतः एवंतुकमित्यापद्येतेतिचेत् अर्शआदित्वंस्वीकृत्यकथंचित्स माधेयं कःस्याद्ब्रह्मानिलार्केष्वितिविश्वोक्तेर्ब्रह्मादिरूपइतितुऋजुःपंथाः विचार्यत्वात्किं अत्रब्रह्मेतिविशेष्यं कायकिमेइतिचतुर्थ्यंतंबोध्यं यच्छब्देन तच्छब्देनचविशिष्यानिर्देश्यवाचिनाब्रह्माभिधीयते यदेतदेइतिचतुर्थ्यंतं यत्तदोर्दांतत्वात् शृदृभसोदिरित्यधिकारेत्यजितनियजिभ्योडिदितिसूत्रात् भक्तास्तुएतिगच्छतितत्रतत्रभक्तहितसाधनायेतियत् तनोतिविविधालीलाइतितदित्याहुः तन्मतेयतेततेइतियदेतदेवाइतिचतुर्थ्यंतंबोध्यं पदमनुत्तममित्येकं

एकोनैकःसवःकःकिंयत्तत्पदमनुत्तमं ॥ लोकबंधुर्लोकनाथोमाधवोभक्तवत्सलः ॥ ९१ ॥
सुवर्णवर्णोहेमांगोवरांगश्चंदनांगदी ॥ वीरहाविषमःशून्योघृताशीरचलश्चलः ॥ ९२ ॥

नामेतिभाष्ये लोकानांबंधुर्हिताहितोपदेशकोलोकबंधुः लोकैर्नाथ्यतेयाच्यतेलोकनाथः मायालक्ष्म्याःधवोमाधवः तुलसीदलमात्रेणजलस्यचुलकेनवा विक्रीणीतेस्वमात्मानंभक्तेभ्योभक्तवत्सलः ॥९१॥ सुवर्णेति सुवर्णवर्णोस्यसुवर्णवर्णः ईदृशेषुपूर्वपदस्यसदृशलक्षकत्वात्सुवर्णसदृशलाभः एवमपिहेमअंगेस्यहेमांगश्चक्रपाण्यादिवदितिभक्ताः तत्रचक्रपाण्यादौप्रहरणार्थेभ्यःपरेनिष्ठासप्तम्यौवक्तव्यावित्यनुशासनसद्भावात्दृष्टांतोविषमः तस्मात्हेमसदृशं हेमैववांगमस्येत्यर्थोबोध्यः यएषोंतरादित्येहिरण्मयःपुरुषइतिश्रुतेः वराण्यंगान्यस्यवरांगः चंदनंचांगदेचद्वयस्यसश्चंदनांगदी चंदनमिवाह्लादकमंगदं तदस्यास्तीतितुनोचितं नकर्मधारयान्मत्वर्थीयइत्युक्तेः असुरवीरान्हंतिधर्मत्राणायवीरहा विगतःसमोस्माद्विषमः सुविनिर्दुर्भ्यइतिषत्वं नत्वत्समोस्त्य

भ्यधिकःकुतोन्यइतिगीतासु सर्वधर्मशून्यत्वाच्छून्यः घृता विगलिताआशिषोऽस्माद्घृताशीः आप्तकामत्वान्नचलतिस्वरूपात्अचलः चलतितत्त्वाणिरूपेणचलः॥९२॥ अमानीति नमानीदेहादौतादात्म्याभिमानवानमानी मानंभक्तानामपिदेहाद्यभिमानंद्यतिमानदः मान्यतेपूज्यतेसर्वैर्मान्यः लोकानांत्रयाणांस्वामी त्रिषुलोकेषुधृष्णोतिप्रगल्भतेत्रिलोकधृक् त्रीन्लोकान्धारयतीतित्रिलोकधृक्इतिभाष्यंतुप्रागल्भ्यस्यैवधारणरूपतयाकथंचिन्नेयं त्रिलोकधृषेइतिचतुर्थ्यंतंपिनाकधृषेइतिवन्नतुत्रिलोकधृतेइति *तकारांतपाठस्यकुत्राप्यदर्शनात् भक्तैरपित्रीन्श्रीमद्वारकामथुराव्रजाख्यान्लोकान्अप्राकृतानिभुवनानिधारयतिइत्युक्त्वात्रिलोकधृक्इतिनाम्नएवधृतत्वात् किंचत्रीन्लोकानित्यपिआर्थिकार्थाभिप्रायेण नत्वेवंविग्रहः दिक्संख्येसंज्ञायामित्यादि

अमानीमानदोमान्योलोकस्वामीत्रिलोकधृक्॥सुमेधामेधजोधन्यःसत्यमेधाधराधरः॥९३॥

ना*त्रिष्वेवसंख्यासमासस्यनियतत्वात् नत्वत्रसमाहारःशंक्यःत्रिककुब्धामेतिवत् यदित्रिलोकीगणनापरास्यादित्यादिवत्त्रिलोकीत्यापत्तेः तस्मात्त्र्यवयवोलोकस्त्रिलोकस्त्रिलोकेधृगितिविग्रहः त्रिलोकनाथेनसतांमखद्विषइत्यादिप्रयोगानुरोधेनेदृशानांशाकपार्थिवादित्वस्यावश्यकत्वात् इत्थमेवचत्रिकालंपूजयेद्देवीमित्यादिष्वपिनिर्वाहइत्यलं शोभनामेधास्यसुमेधाःसांतः नञ्दुःसुभ्यइत्यनुवृत्तौनित्यमसिच्प्रजामेधयोरित्यसिच् सुमेधसेइतिचतुर्थ्यंतं

* इदानींतनपुस्तकेषुक्वचिद्भाष्येतकारांतपाठस्याप्युपलब्ध्याविचारणीयमेतत् किंचभाष्यस्यफलितार्थकथनपरत्वकथनमपिनयुक्तं सर्वत्रलेखकप्रमादवशेनपाठवैषम्यसंभवात् पूर्वत्रविश्वधृगित्यत्रविश्वस्मिन्धृष्णोतिप्रगल्भतेइतिव्युत्पादनेनविश्वधृगित्येतदतिरिक्तस्थलेतांतपाठस्यैवसंमतत्वात्

* तद्धितार्थेविषयेउत्तरपदेसमाहारेच

मेधेशक्रमखंनिराकृत्यप्रवर्त्तितेगिरियज्ञेऽन्नकूटभोक्तृत्वेनप्रादुर्भूतोमेधजः धन्यःसुकृती सुकृतीपुण्यवान्धन्यइतिकोशः धन्यापितृमुखीकन्याधन्योमा तृमुखःसुतइतिसामुद्रिकं सत्यामेधास्यसत्यमेधाइतिभाष्ये अत्रासिच्चिंत्यः मूलंतुदेवतांविशेष्यामादायसत्यमेधेत्याबंतस्यबहुव्रीहिकर्मधारयान्यतररू पाश्रयणेनसुयोज्यं सत्यमेधसेइतिचतुर्थ्यंतंभाष्यकृन्मते युक्तंतुसत्यमेधायैइति शेषरूपेणधरायाःधरःधराधरः॥१३॥तेजइति तेजसादित्यरूपेणवर्षतिते जोवृषः आदित्याज्जायतेवृष्टिरित्युक्तेः भक्तास्तुतेजइतिपृथक्छित्वासर्वेभ्यःश्रेष्ठत्वाद्वृषइत्याहुः तन्नमनोहरं स्युरुत्तरपदेव्याघ्रपुंगवर्षभकुंजराः सिंहशार्दू लनागाद्याःपुंसिश्रेष्ठार्थगोचराइत्युत्तरपदभूतानामेवैषांश्रेष्ठपर्यायत्वोक्तेः व्याघ्रशार्दूलपुंगवर्षभेत्युभयोपादानेनपर्यायांतराग्रहणात् आद्यशब्दान्मुखचंद्र

तेजोवृषोद्युतिधरःसर्वशस्त्रभृतांवरः॥ प्रग्रहोनिग्रहोव्यग्रोनैकशृंगोगदाग्रजः॥ १४॥

पादपद्माइतिक्षीरस्वाम्यादिव्याख्यानेनततोपिऋषभशब्दस्यवृषवाचकत्वालाभाच्च तत्रअन्योपिविशेषोमत्कृतायांतट्टीकायांज्ञेयः द्युतेर्धरोद्युतिधरः सर्व शस्त्रभृतांवरःस्पष्टः भक्तैस्तूपाहृताःसपर्याःप्रकर्षेणगृह्णातिप्रग्रहः याभक्तैःसंप्रयुक्ताश्चएकांतगतबुद्धिभिः ताःसर्वाःशिरसादेवःप्रतिगृह्णातिवैस्वयमित्युक्तेः गृह्णातिदृप्तान्निग्रहः व्यग्रइतिच्छेदः विगतम*ग्रंनाशोस्येत्यर्थः भक्तानुग्रहेव्यग्रइतिवा भक्तास्तुअव्यग्रोनाकुलइत्याहुः चत्वारिशृंगेतिमंत्रवर्णान्नैकशृंगः निगदेनमंत्रेणाग्रेजायतइतिगदाग्रजः निशब्दलोपआर्षः उक्तंहिबृहद्देवतायां वर्णस्यवर्णयोर्लोपोबहूनांव्यंजनस्यवा अत्राणीतिकपिर्नाभादनोयामीत्य घासुचेति अत्राण्यस्मैपड्भिःसंभरंति अमत्राणीत्यपेक्षिते प्रियातष्टानिमेकपिः वृषाकपिरित्यपेक्षिते अयंनाभावदतिवल्गुवोगृहेदनोविशइंद्रमृद्भवाचः ना

* अग्रशब्दस्यनाशपर्यायत्वंभाष्ये

भानेदिष्टइतिदानमनसइतिचापेक्षिते तत्त्वायामि॰ अघासुहन्यंतेगावः याचामीतिमघास्वितिचापेक्षिते इदंचसर्वंश्रीमदाचार्यकृतव्याख्यानबलादुन्नीय
ते उक्तंच व्यासोदितःशंकरबोधितश्चेद्यःशंकरोसौसवितासईशइति यद्वागदोनामश्रीकृष्णस्यावरजस्तस्मादग्रजइति॥ ९४॥चतुरिति चतस्रोमूर्त्तयोविराट्
हिरण्यगर्भेशतुरीयाख्याअस्यचतुर्मूर्त्तिः चत्वारोबाहवोऽस्यचतुर्बाहुः चतुर्भुजंशंखगदार्युदायुधमितिदशमे चतुर्बाहुरितिनामवासुदेवेरूढमितिवदतांभा
ष्यकृतामाशयंतुनविद्मः चत्वारोव्यूहाःशरीरपुरुषश्छंदःपुरुषोवेदपुरुषोमहापुरुषइत्यैतरेयकोपनिषदुक्ताअस्यचतुर्व्यूहः चतुर्णांवेदानांतात्पर्यविषयत्वा
च्चतुर्गतिः चतुरःआत्मामनोऽस्यचतुरात्मा चत्वारोमनोबुध्यहंकारचित्ताख्याःआत्मानोंतःकरणान्यस्यवा तन्मनोस्रजतेतिश्रुतेः चतुर्णामप्याश्रमाणां

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ॥ चतुरात्माचतुर्भावश्चतुर्वेदविदेकपात् ॥ ९५ ॥
समावर्त्तोनिवृत्तात्मादुर्जयोदुरतिक्रमः ॥ दुर्लभोदुर्गमोदुर्गोदुरावासोदुरारिहा ॥ ९६ ॥

भावःप्रेमास्मिंश्चतुर्भावः चतुरोवेदान्वेत्तिचतुर्वेदवित् चतुर्वेदस्त्रिलोकवत् एकःपादोस्यजगत्एकपात् ॥ ९५ ॥ समावर्त्तेति समावर्त्तयतिसंसारचक्रंस
मावर्त्तः सर्वत्रवर्त्तमानत्वादनिवृत्तआत्मास्यअनिवृत्तात्मेतिभाष्ये निवृत्तोविषयेभ्यआत्मास्यनिवृत्तात्मावा दुःखेनजेयोदुर्जयः दुःखेनातिक्रमणीयो
दुरतिक्रमः भीषास्मादितिश्रुतेः दुर्लभयाभक्त्यैवलभ्यत्वाद्दुर्लभः जन्मांतरसहस्रेषुतपोज्ञानसमाधिभिः नराणांक्षीणपापानांकृष्णेभक्तिःप्रजायतेइति
व्यासः भक्त्यालभ्यस्त्वनन्ययेतिभगवांश्च दुःखेनगम्यतेदुर्गमः अंतरायप्रतिहतैस्तुअतिदुःखेनगम्यतेदुर्गः अधिगतोपिदुःखेनहृदयेआवास्यतेदुरावासः
दुष्टंयथातथाइयतितच्छीलाःदुरारिणः ऋधातोर्णिनिः तान्हंतिदुरारिहा ॥ ९६ ॥

शुभांगइति शुभान्यंगानिअस्यशुभांगः पुनः अंगान्यंगदेवतास्तत्तदुपासनेषु लोकेसारंगोभ्रमरइवलोकसारंगः शोभनस्तंतुस्तन्यमानःप्रपंचोस्यसुतंतुः त मेवतंतुवर्धयतितंतुवर्धनः इंद्रःकर्मास्यइंद्रकर्मा पूर्वपदस्यइंद्रकर्मसदृशेलक्षणयोचितार्थलाभः सुधर्माक्रम्यतेयेनपारिजातोमरांघ्रिपः आनीयभुज्यतेसो सौनकिलाध्यासनार्हणइतिदशमेसाकूतश्रीबलदेवोक्तेः महांत्यपिभूतानिकर्माणिकार्याण्यस्यमहाकर्मा कृतमेवकर्मास्यकृतकर्मा कृतमेवास्यजानंती तिविदुरोक्तेः कृतःपर्याप्तश्चतुर्विधपुरुषार्थप्रापणेआगमोस्यकृतागमः युगपर्याप्तयोःकृतमितिकोशः ॥ ९७ ॥ उद्भवइति उद्भवत्यस्मात्जगत्पुनःउद्भवः विश्वातिशायिसौंदर्यवत्त्वात्सुंदरः सुष्ठुउनत्तिसुंदः आर्द्रवाचकेनानेनकरुणाकरोलक्ष्यतेइतिभाष्यकृतः पररूपंपृषोदरादित्वादितिचतएव भक्तास्तुमुदिशो

शुभांगोलोकसारंगःसुतंतुस्तंतुवर्धनः ॥ इंद्रकर्मामहाकर्माकृतकर्माकृतागमः ॥ ९७ ॥
उद्भवःसुंदरःसुंदोरत्ननाभःसुलोचनः ॥ अर्कोवाजसनःशृंगीजयंतःसर्वविज्जयी ॥ ९८ ॥

भायामित्यस्यकल्पद्रुमपठितस्याचिरूपं तेनशोभावानित्यर्थमाहुः रत्नवन्नाभिरस्यरत्ननाभिः शोभनंलोचनंवेदरूपमस्यसुलोचनः अर्च्यतेर्कः वाजमन्नं सनोतिददातिवाजसनइतिभाष्ये भक्तास्तुवाजंघृतेपियज्ञान्नेइतिविश्वकोशाद्वाजंददातिगोपेभ्योवानरेभ्योवेत्यर्थमाहुः चतुर्विधेनाशयित्वास्वयंसबुभुजे प्रभुरितिदशमे मर्कायकामंददतमितिच शृंगमस्यास्तिमत्स्यावतारेशृंगी जयतिजयंतः सर्वंविंदतिलभतेसर्ववित् जयशीलोजयी जीदृक्षीतिणिनिःसर्व विच्चासौजयीचसर्वविज्जयीत्येकंनामेतिभाष्ये सर्वविज्जयिनेइतिचतुर्थ्यंतं ॥ ९८ ॥ सुवर्णेति सुवर्णाःशोभनवर्णाःबिंदवोवयवाअस्यसुवर्णबिंदुः बिंदुर्लवे प्यवयवेइतिमेदिनी सुवर्णःसुवर्णसदृशाइतिभाष्यंतुशोभनवर्णत्वेनैवसुवर्णसदृशलाभाद्व्याख्येयं नतुपूर्वपदस्यसदृशलक्षणायांलिंगापगमः लिंगस्यशब्दध

मत्वादितिविदितमेवसुधियां सुवर्णंकनकंस्वर्णमितिसुवर्णशब्दस्यनपुंसकत्वंच आप्रणखात्सर्वएवसुवर्णइतिश्रुतिः इतिअष्टमंशतं ॥८००॥ क्षोभकैरपिन क्षोभ्यतेअक्षोभ्यः सर्ववागीश्वरेश्वरःस्पष्टः महांस्तीर्थरूपोह्रदःकालियस्यानेनमहाह्रदः कालियह्रदंप्रकृत्यउपोष्यमांस्मरन्नर्चैत्सर्वपापैःप्रमुच्यतइतिद शमोक्तेः गर्तशब्दोनैरुक्तैरथपर्यायउक्तस्तेनमहारथइत्युक्तंभवतीतिभाष्ये एकोदशसहस्राणियोधयेद्यस्तुधन्विनां शस्त्रशास्त्रप्रवीणःसमहारथइतिस्मृतइ तिमहाभारते महान्गोवर्द्धनाद्रिसंबंधीगर्तोस्येतितुभक्ताः तथानिविविशुर्गर्त्तमितिदशमे महान्भूतःसत्यःपरमार्थसत्योमहाभूतः तेषामेषसत्यमितिश्रुतेः महान्निधिरिवोपादेयोयंमहानिधिः ॥ ९९ ॥ कौमोदतेकुमुदः मुदिमंतर्भावितण्यर्थमाश्रित्यकुंमोदयतीत्यर्थइतिभाष्ये कुंदवत्स्वच्छानिकर्मफलानिरा

सुवर्णबिंदुरक्षोभ्यःसर्ववागीश्वरेश्वरः॥ महाह्रदोमहागर्त्तोमहाभूतोमहानिधिः॥९९॥
कुमुदःकुंदरःकुंदःपर्जन्यःपवनोनिलः॥ अमृताशोमृतवपुःसर्वज्ञःसर्वतोमुखः॥ १००॥

तिददातिकुंदरः कुंदान्यस्यसंतिकुंदः कुंददामकृतकौतुकवेषइत्युक्तेः पर्जन्यइवतापनाशनःपर्जन्यः वायुरिववेगवान् पुनःपवनः इलतिइलःप्रेरकःस नास्त्यस्यानिलःपुनः अमृतंदेवभाग्यमाशयतिदेवानमृताशः अमृतंमरणरहितंवपुरस्यामृतवपुः सर्वज्ञाअस्यपुनःसर्वज्ञः सर्वतोमुखान्यस्यसर्वतोमुखः ॥ ॥ १०० ॥ सुलभइति नामगाननृत्यादिमात्रादपिसुखेनलभ्यतेसुलभः गीत्वातुममनामानिनृत्यंतिममसन्निधौ तेषामहंपरिक्रीतोनान्यक्रीतोधनंजयेत्या दित्यपुराणे पत्रेषुपुष्पेषुफलेषुतोयेष्वक्रीतलभ्येषुसदैवसत्सु भक्त्यैकलभ्येपुरुषेपुराणेमुक्तौकथंनक्रियतेप्रयत्नइतिमहाभारते शोभनंव्रतयतिभुंक्तेसुव्रतः स्वसिद्धावन्यानपेक्षत्वात्सिद्धः शत्रून्कामादीन्जयतिशत्रुजित् शत्रूंस्तापयतिशत्रुतापनः न्यक्कृत्यसर्वाणिभूतानिरुणद्धिआवृणोतिन्यग्रोधः उदुंबरम

टीका. ॥ २६॥

न्नाद्यंनदात्मनापोषयन्नुदुंबरइत्युच्यतेइतिभाष्ये ऊर्ग्वाअन्नाद्यमुदुंबरइतिश्रुतेः न्यग्रोधोदुंबरइतिसंधिरार्षः नश्वोपिस्थानेत्यश्वत्थः पृषोदरादिः नाद्दक्
प्रपंचरूपइत्यर्थः ऊर्ध्वमूलमधःशाखमश्वत्थमितिभगवद्गीतासु चाणूरनामानमांध्रमांध्रदेशोद्भवंकंसहतकस्यमल्लंनिषूदयतिचाणूरांध्रनिषूदनः ॥१०१॥
सहस्रेति सहस्राणिअर्चींप्यस्यसहस्रार्चिः सप्तकालीकरालीचमनोजवाचसुलोहितायाचसुधूम्रवर्णा स्फुलिंगिनीविश्वरुचीचेत्यासप्ताजिह्वाअस्याग्नि
रूपस्यसप्तजिह्वः एवंसप्तैधांसिसमिधोऽस्यतद्रूपस्यैवसप्तैधाः सप्ततेअग्नेसमिधःसप्तजिह्वाइतिश्रुतेः सप्तवाहनानिसूर्यरूपस्यास्यसप्तवाहनः सप्ताश्वरथसं

सुलभःसुव्रतःसिद्धःशत्रुजिच्छत्रुतापनः॥ न्यग्रोधोदुंबरोऽश्वत्थश्चाणूरांध्रनिषूदनः॥ १०१॥
सहस्रार्चिःसप्तजिह्वःसप्तैधाःसप्तवाहनः॥ अमूर्त्तिरनघोऽचिंत्योभयकृद्भयनाशनः॥ १०२॥
अणुर्बृहत्कृशःस्थूलोगुणभृन्निर्गुणोमहान्॥ अधृतःस्वधृतःस्वास्यःप्राग्वंशोवंशवर्द्धनः॥ १०३॥

युक्तोद्विभुजःस्यात्सदारविरित्युक्तेः नास्तिमूर्त्तिर्घनरूपमस्यामूर्त्तिः पुनरनघोऽपापः अनघोऽपापदुःखयोरितिधरणीकोशे इत्थमयमित्यशक्यचिंतनत्वा
दचिंत्यः भयकृत्अभक्तानां भयनाशनोभक्तानां ॥१०२॥ अणुरिति एषोणुरात्माचेतसावेदितव्यइतिश्रुतेरणुःसूक्ष्मः बर्हतेवर्धतेबृहत् अत्रत्रर्ग्राविशेप्यं
कृशःअविद्यादशायांस्थूलोपि गुणान्कल्याणान्बिभर्त्तिगुणभृत् परमार्थतोनिर्गुणः महान् सर्वधर्मोज्झितान्विष्णोर्नाममात्रैकजल्पकाः सुखेनयांगतिं
यांतिनतांसर्वेपिधार्मिकाइतिनाममात्रेणजगदुद्धारकत्वात् नकेनापिधृतोऽधृतः किंतर्हिस्वधृतः स्वेमहिम्निप्रतिष्ठितइतिश्रुतेः शोभनंवेदनिःश्वसितशा
लितयाआस्यमस्यस्वास्यः प्रागेववंशोऽस्यप्राग्वंशः ब्रह्मादिरूपोहिभगवद्वंशस्तत्तदवतारेभ्यःप्रागितिप्रसिद्धं वंशंपांडवानांपरिक्षिद्रक्षणेनवर्धयतिवं

शवर्धनः ॥ १०३ ॥ भारेति अनंतादिरूपेणभुवोभारंबिभर्त्तिभारभृत् कथितःपुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरितिश्रुत्यातात्पर्यविषयीकृतः योगश्चित्तवृत्तिनिरोधःसोस्यास्तीतियोगी अन्येतुयोगिनोंतरायैर्विहन्यंतेभगवांस्तुनतथेतियोगीशः सर्वान्कामान्ददातिसर्वकामदः संसारारण्येभ्रमतांविश्रामस्थानत्वादाश्रमइवआश्रमः श्रमयतिखेदयतिभक्तविरोधिनःश्रमणः श्रमुतपसिखेदेचेतिपाठात् क्षामाःकरोतिप्रजाःप्रलयकालेक्षामः तत्करोतीतिणिजंतादच् शोभनानिच्छंदोरूपाणिपत्राण्यस्यसंसारतरुरूपस्यसुपर्णः छंदांसियस्यपर्णानीत्युक्तेः वायुंवाहयतिवायुवाहनः ॥ १०४ ॥ धनुर्धरइति

भारभृत्कथितोयोगीयोगीशःसर्वकामदः ॥ आश्रमःश्रमणःक्षामःसुपर्णोवायुवाहनः ॥ १०४ ॥
धनुर्धरोधनुर्वेदोदंडोदमयितादमः ॥ अपराजितःसर्वसहोनियंतानियमोयमः ॥ १०५ ॥
सत्ववान्सात्विकःसत्यःसत्यधर्मपरायणः ॥ अभिप्रायःप्रियार्होर्हःप्रियकृत्प्रीतिवर्द्धनः ॥ १०६ ॥

धनुषोधरोऽसाधारण्येनधनुर्धरः श्रीरामावतारे धनुर्वेत्तितद्गुणदोषान्जानातिधनुर्वेदः दमयतिदंडः दंडोदमयतामस्मीतिवचनात् मन्वादिरूपेणदमयतिप्रजांदमयिता दंडस्यफलंदम्यनिष्ठोदमःसोपिसएवेतिदमः अपराभिर्जात्यादिभिरनुत्कृष्टाभिर्गोपीभिर्जितःपुनरपराजितः सर्वान्शत्रून्सहतेसर्वसहः अयंचरणोनवाक्षरः सर्वान्स्वस्वकृत्येषुनियमयतितच्छीलोनियंता नविद्यतेनियमोन्यकृतोस्यानियमः नास्तियमोमृत्युरस्यायमः नियमोयमश्चयोगांगेतद्रम्यत्वान्नियमःयमश्चेतिचभाष्ये ॥ १०५ ॥ सत्ववानिति सत्वमाद्यगुणस्तत्प्रशस्तमस्यास्तिसत्ववान् सत्वेप्राधान्येनस्थितःसात्विकइतिभाष्ये सत्सुसाधुःसत्यः सत्येधर्मेचतत्परःसत्यधर्मपरायणः अभिप्रेयतेसर्वपुरुषार्थकांक्षिभिरभिप्रायः प्रियाणिअर्हतिप्रियार्हः यद्यदिष्टतमंलोकेयच्चास्यदयितंगृहे

तत्तद्गुणवतेदेयंतत्तदक्षयमिच्छतेतिस्मरणात् स्वागतासनपाद्यादिपूजामर्ह्यर्हतिअर्हः . प्रियंसुखंकरोतिभक्तानांप्रियकृत् प्रीतिंविषयेषुभक्तानांस्वस्मिन्प्री
तिदानेनवर्धयतिच्छेदयतिप्रीतिवर्धनः ॥ १०६ ॥ विहायसेति विहायसेआकाशेगतिरस्यविहायसगतिः अकारांतोपिविहायसशब्दोऽतएवास्तीतिग
म्यते द्योततेज्योतिःसुष्ठुरुचिःकांतिरस्यसुरुचिः समस्तदेवतोद्देशेनहुतंस्वयंभुंक्तेहुतभुक् अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवचेतिभगवद्गीतासु विभुःप्रभुः
विभुःशिवेप्रभौनित्यइतिविश्वः रसमादत्तेरविरादित्यात्मेतिभाष्ये रसानांचतथादानाद्रविरित्यभिधीयतइतिविष्णुधर्मोत्तरे रसंशृंगारादिमादत्तेइतितुभ
क्ताः सर्वथापृषोदरादित्वमिति रौतिरविः अचइः ब्रह्मणोवेदाध्यापकइत्यर्थः सूर्यपरत्वेपीयंव्युत्पत्तिःसंगतैव सूर्योहियाज्ञवल्क्यस्यबृहदारण्यकोपदे

विहायसगतिर्ज्योतिःसुरुचिर्हुतभुग्विभुः ॥ रविर्विरोचनःसूर्यःसवितारविलोचनः ॥ १०७॥
अनंतोहुतभुग्भोक्तासुखदोनैकजोग्रजः ॥ अनिर्विण्णःसदामर्षीलोकाधिष्ठानमद्भुतः ॥ १०८॥

ष्टा तथाचश्रुतिः ज्ञेयंचारण्यकमहंयदादित्यादवाप्तवानिति तत्ररूढिरिहतुयोगआश्रयणीयः यानिनामानिगौणानीत्युक्तेः विशेषेणरोचतेविरोचनः सर
त्याकाशेसूर्यः सूर्यआत्माजगतस्तस्थुषश्चेतिश्रुतेः सूतेजगत्सविता प्रजानांत्वंप्रसवनात्सवितेतिनिगद्यसइतिविष्णुधर्मोत्तरे रविर्लोचनमस्यरविलोचनः
अग्निर्मूर्धाचक्षुषीचंद्रसूर्याविितिश्रुतेः ॥ १०७ ॥ अनंतइति नास्तिअंतःपरिच्छेदोस्यपुनरनंतः नह्यंतोमद्विभूतीनांसोनंतइतिगीयतइतिवचनं हुतंभुन
क्तिअग्निरूपेणपुनर्हुतभुक् भोक्तापुनःप्रकृतेः श्रीकृष्णावतारेनवनीतादेर्वा सुखान्यभक्तानांददातिपुनःसुखदः अनेकेषुदेशेषुवाअनेकेभ्योवाभक्तेभ्योजा
यतेऽनेकजः नैकजइतिपाठेप्ययमेवार्थः अग्रेजायतेहिरण्यगर्भरूपेणाग्रजः हिरण्यगर्भःसमवर्त्ततागेइतिश्रुतेः ननिर्विण्णःशिथिलप्रयत्नः अनिर्विण्णः

अनिर्वेदःश्रियोमूलमितिविदुरोक्तौ सतःसाधूनाभिमुख्येनन्नृष्यतेक्षमतेसदामर्षी लोकानामधिष्ठानमज्ञातंसत्कारणंलोकाधिष्ठानं अनेकशक्तित्वादद्भुतः ॥१०८॥सनादिति सनादितिनिपातश्चिरकालार्थः कालश्चभगवतएवरूपमतःसनात् परस्यब्रह्मणोरूपंपुरुषःप्रथमंद्विज व्यक्ताव्यक्तेतथैवान्येरूपेकालस्तथापरमितिविष्णुपुराणे सन्वंतिसर्वंभगवतेपर्यंतिसनास्तानततिसातत्येनगच्छतिसनादितिभक्ताः आद्येसनादितिचतुर्थ्यंतं अंत्येतुसनातेइति षणुदानेअतसातत्यगमनेइतिधातू ब्रह्मादीनामपिकारणत्वात्सनाततनतमः वडवानलस्यकपिलोवर्णइतितद्रूपीकपिलइतिभाष्ये कर्दमप्रजापतेर्देवहूत्यांप्रादुर्भूतःकपिलो

वा कंजलंरश्मिभिःपिबन्कपिरितिभाष्ये कपिर्वराहोवेतिच कपिर्वराहःश्रेष्ठश्चेतिवचनात् अप्येतिजगदस्मिन्अप्ययः इतिनवमंशतं ॥ ९०० ॥ स्व

सनात्सनातनतमःकपिलःकपिरव्ययः॥ स्वस्तिदःस्वस्तिकृत्स्वस्तिस्वस्तिभुक्स्वस्तिदक्षिणः॥ १०९॥

स्तिददातिभक्तेभ्यःस्वस्तिदः स्वस्तिंकरोतिअभक्तानांस्वस्तिकृत् कल्याणरूपत्वात्स्वस्ति स्वस्तीत्येवचतुर्थ्यंतं स्वस्तिरितिसविसर्गपाठोऽप्रामाणिकः यद्वास्वस्तयेवायुमुपब्रवामहैसोमंइत्यादिवैदिकप्रयोगान्मंगलार्थोऽनव्ययमपिस्वस्तिशब्दोस्ति प्रयुक्तश्चखंडप्रशस्तौ समस्तनिगमस्तुतोनृहरिरस्तुनःस्वस्तयइति अस्मिन्पक्षेसविसर्गपाठोपिप्रामाणिकः स्वस्तयेनमइतिचतुर्थ्यंतंचबोध्यं स्वस्तिभक्तानांमंगलंभुनक्तिपालयतिस्वस्तिभुक् स्वस्तिकल्याणविषयेदक्षिणः शीघ्रकारीस्वस्तिदक्षिणः स्मृतेसकलकल्याणभाजनंयत्रजायते पुरुषस्तमजंनित्यंव्रजामशरणंहरिमित्यादिवचनेभ्यः ॥ १०९ ॥ अरौद्रइति रौद्रंभया नकंकर्मतन्नास्त्यस्यअरौद्रः कुंडलीस्पष्टः चक्रोयादवगणः सोस्यास्तिचक्री चक्रोगणेचक्रवाकेचक्रंसैन्यरथांगयोरितिविश्वः विक्रमीस्पष्टः ऊर्जितंशासनमस्येत्यूर्जितशासनः स्मरंतिममनामानियेत्यक्त्वाकर्मचाखिलं तेषांकर्माणिकुर्वंतिऋषयोभगवत्पराइत्यादिपुराणेशासनं तावत्कर्माणिकुर्वीतननिर्विद्येत

तयावता मत्कथाश्रवणादौवाश्रद्धायावन्नजायतइतिभागवते नमेभक्तःप्रणश्यतीतिभगवद्गीतायां शब्दानतीत्यगच्छतिशब्दातिगः यतोवाचोनिवर्त्ततइ तिश्रुतेः शब्दान्सहतेस्वैकतात्पर्यान्करोतिशब्दसहः वेदैश्चसर्वैरहमेववेद्यइतिवचनात् शिशिरःसंसारतापनाशकत्वात् शर्वरीसंसारिणामात्माज्ञानिनांसं सारः यानिशासर्वभूतानामित्युक्तेः तांकरोतिशर्वरीकरः भुक्तिमुक्तिप्रदइत्यर्थः ॥ ११० ॥ अक्रूरःस्पष्टः कर्मणामनसावाचावपुषाचरुचिरत्वात्पेश लः पेशलोरुचिरेदक्षेइतिविश्वः दक्षःशीघ्रकारी दक्षिणःसरलादिः दक्षिणःसरलोदारपरच्छंदानुवर्त्तिषु क्षमिणांवरःस्पष्टः अतिशयेनविद्वान्विद्वत्तमः वी तंभयंयस्माद्वीतभयः पुण्यश्रवणकीर्त्तनःस्पष्टः ॥ १११ ॥ उत्तारणइति संसारादुत्तारयत्युत्तारणः दुष्टांकृतिंहंतिदुष्कृतिहा पुण्यंकरोत्याचष्टेवापुण्यः

अरौद्रःकुंडलीचक्रीविक्रम्यूर्जितशासनः॥ शब्दातिगःशब्दसहःशिशिरःशर्वरीकरः॥ ११०॥
अक्रूरःपेशलोदक्षोदक्षिणःक्षमिणांवरः॥ विद्वत्तमोवीतभयःपुण्यश्रवणकीर्त्तनः॥ १११ ॥
उत्तारणोदुष्कृतिहापुण्योदुःस्वप्ननाशनः॥ वीरहारक्षणःसंतोजीवनःपर्यवस्थितः॥ ११२ ॥

दुःस्वमान्नाशयतिस्मृतमात्रोदुःस्वमनाशनः विविधानीरान्संसारगतीर्हंतिवीरहा ईरगतौकंपनेच रक्षतिरक्षणः सन्मार्गवर्त्तिनःसंतस्तद्रूपेणविद्याविनयः वृद्धयेसएववर्त्ततेसंतः अत्रसङ्घोनमइत्येवचतुर्थ्यंतं नमोवृक्षेभ्योहरिकेशेभ्यइतिवत् भक्ताअपिसाधुत्वात्प्रशस्तत्वाच्चसंतः बहुवचनन्यासस्तुपूजार्थइत्यु क्तेरेव सनोतिददातिआत्मपर्यंतंभक्तेभ्यःसंतः औणादिकतप्रत्ययांतोयमदंतोवेत्याहुः जीवयतिजीवनः परितोविश्वंव्याप्यावस्थितःपर्यवस्थितः ॥ ॥ ११२ ॥ अनंतेति अनंतानिरूपाण्यस्यअनंतरूपः अनंताःश्रियोस्यअनंतश्रीः समासांतविधेरनित्यत्वान्नकप् अनंतश्रीरूपोवा जितोमन्युरनेनजि

तमन्युः भयमपहंतिभयापहः न्यायसमवेतश्चतुरस्रः कर्मानुरूप्येणफलदानादितिभाष्ये भक्तास्तुचतुर्णामस्रमनेनेतिचतुरस्रः दुर्योधनस्यकर्णस्यशकुनेःसौ बलस्यच दुःशासनचतुर्थानांभूमिःपास्यतिशोणितमितिवनपर्वस्थद्रौपदीसमाश्वासनेश्रीकृष्णवाक्यादित्याहुः गभीरआत्मामनोस्यगभीरात्मा विविधा निफलानिदिशतिभक्तेभ्योविदिशः विशेषेणआदिशतिव्यादिशः दिशत्युपदिशतिवेदरूपेणकर्माणिफलानिचदिशः ॥ ११३ ॥ अनादिरिति नआदिः

॥ ३१ ॥ कारणमस्यानादिः नतस्यकार्यंकरणंचविद्यतइतिश्रुतेः भूरिवसर्वाश्रयोभूः भुवोलक्ष्मीःशोभाचेतिऋजुःपंथाः भक्ताअप्येवं भाष्येतुभूराधारःसर्वभूता नामाश्रयत्वेनप्रसिद्धायाभुवोभूम्याअपीतिभूर्भुवः नकेवलमसौभूर्भुवः लक्ष्मीःशोभाचेति भुवोलक्ष्मीरित्युक्तं अत्रभुवःपदस्यमध्यस्थस्यानुषंगेणभूर्भु

अनंतरूपोऽनंतश्रीर्जितमन्युर्भयापहः ॥ चतुरस्रोगभीरात्माविदिशोव्यादिशोदिशः ॥ ११३ ॥
अनादिर्भूर्भुवोलक्ष्मीःसुवीरोरुचिरांगदः ॥ जननोजनजन्मादिर्भीमोभीमपराक्रमः ॥ ११४ ॥

वइतिभुवोलक्ष्मीरितिचनाम्नोरानुपूर्वीभाष्यकृतोभिप्रेतानतुभुवोभूरितिलक्ष्मीर्भुवइतिवा भुवइत्यस्योभयत्रसंबंधेपिपूर्वापेक्षयोत्तरत्वस्यउत्तरापेक्षयापू र्वत्वस्यचपाठावगतस्याबाधेनोपपत्तौबाधायोगात् अन्यथाइतिभुवोभूःनकेवलमसौभुवोभूर्लक्ष्मीःशोभाचेतिलक्ष्मीर्भुवइतिभाष्यकारेणोच्येत एवं स्थितेचित्रविभक्तिकनामद्वयात्मकनाम्निविशेष्यबोधकास्यथमोपलक्षितान्नाम्नश्चतुर्थीप्रयोज्येतिभुवेभुवोनमोभुवोलक्ष्म्यैनमइतिप्रयोगोनतुभुवोभुवे नमइतिनापिभुवेनमोभुवइतिचतुर्थीप्रयोजनेप्याम्नातक्रमस्यत्यागायोगात् येननाव्यवधानन्यायेनचतुर्थीमात्रेणव्यवधानस्यौचित्यात् नमःसक ॥३१ लकल्याणभाजनायपिनाकिने नमोलक्ष्मीनिवासायदेवतायैगिरांनमइतिवव्यवहितनमःशब्दयोगेपिचतुर्थ्यनुशासनाच्च क्वचिन्नामावल्यांभुवोभु

वेनमइतिदृश्यते युक्तंतुसुधियोविचारयंतु भूर्भूर्लोकोभुवर्भुवर्लोकस्तयोःशोभेतिवा भूर्भुवोलक्ष्मीरित्येकनामत्वपक्षोपिभाष्येउक्तःसतुनवक्ष्यमाणसंख्याविभागसंवादी शोभनावीराःपुत्राअस्यसुवीरः रुचिरेअंगदेस्यरुचिरांगदः जनयतिप्रादुर्भावयतिप्रद्युम्नादीन्जननः जनस्यजन्यमात्रस्यजन्मउत्पत्तिस्तस्यादिःकारणंजनजन्मादिः भीमोभयहेतुः भीमपराक्रमःस्पष्टः ॥ ११४ ॥ आधारेति आधाराणांभौतिकाश्रयाणामपिमहाभूतानांनिलयआधारआधारनिलयः नास्तिधाताधारकोस्यअधाता नद्यृतश्चेतितुनसमासांतविधेरनित्यत्वात् धयतिजगत्पिबतिसंहारसमयेधाता धेट्पानेइतिभाष्येपुष्पवदाल्हादकोहासोस्यपुष्पहासः प्रकृष्टोनिद्राव्यधिकरणोजागरोस्यप्रजागरः जीवानांज्ञानमज्ञानंचभगवतस्तुसर्वदासर्वविषयंज्ञानमेवेत्यर्थः

आधारनिलयोऽधातापुष्पहासःप्रजागरः॥ ऊर्ध्वगःसत्पथाचारःप्राणदःप्रणवःपणः॥ ११५॥
प्रमाणंप्राणनिलयःप्राणभृत्प्राणजीवनः॥ तत्त्वंतत्त्वविदेकात्माजन्ममृत्युजरातिगः॥ ११६॥

ऊर्ध्वैसर्वतोप्युत्कृष्टेवैकुंठलोकेगच्छतिगमनादिव्यवहारंकरोतिऊर्ध्वगः सतांपंथाःपथोवासत्पथस्तमाचारयतिलोकसंग्रहार्थं स्वयमपिकर्मकुर्वन्सत्पथाचारः पथिशब्देनसमासेअःसमासांतः वाटःपथश्चमार्गश्चेतित्रिकांडशेषः प्राणान्परिक्षितोददातिपुनःप्राणदः प्रणवःप्रणूयतेस्तूयतेइतिप्रणवः पुनर्भगवद्वाचकः वाच्यवाचकयोरभेदेनप्रणवउच्यतेपरमात्मा प्रणतेव्यवहरतिभक्तैःपणः ॥ ११५ ॥ प्रमाणमिति प्रमाणंयादवानांमर्यादारूपः तेषांप्रमाणंभगवान्प्रभुत्वेनाभवद्धरिरितिदशमे प्राणितिप्राणोजीवस्तस्यनिलयः अनौपाधिकंरूपंप्राणनिलयः प्राणभृदन्नादिरूपेणप्राणपोषकः प्राणान्जीवयतिप्राणजीवनः भक्तास्तुप्राणिजीविनइतिपाठंधृत्वाप्रशस्ताःप्राणाःसंश्लेषांप्राणिनोव्रजादिजनास्तेषुजीवनमस्येत्यर्थमाहुः तत्त्वंअबाधितस्वरूपं तत्त्वंपरंयोगि

नामितिदशमे तत्त्ववेत्तिजीवरूपेणतत्त्ववित् एकश्चासावात्माचएकात्मा जीवपटभेदस्यजीवभेदस्यच मिथ्यात्वोपगमात् जन्ममृत्युजराःषण्णांभावविका
राणामुपलक्षणं ताअतिगच्छतिजन्ममृत्युजरातिगः ॥ ११६ ॥ भूरिति भूर्भूवःस्वःसमाख्यास्त्रयोलोकास्तेषांतरुःकल्पवृक्षइवाभीष्टार्थदोभूर्भुवःस्वस्तरुः
तारयतिभक्तांस्तारः सःपितेत्येकमिदंनाम सःसर्वसाधारणत्वेनलोकोत्तरःपितासपिता अत्रतस्मैपित्रेइतिचतुर्थ्यंतं भिन्नविभक्तिकत्वात् नामावल्यांतु
॥३२॥ सपित्रेइतिदृश्यते तत्रोपपत्तिः समानस्यच्छंदसीतिसूत्रेसमानस्येतियोगोविभज्यते तेनसपक्षःसाधर्म्यंसजातीयइत्यादिसिद्धमितिकाशिका सर्वस्यजनक
त्वात्स पितेतिभाष्यस्यसमानःपितासपितेत्यर्थेप्यनुकूलत्वात्काशिकोक्तादिशब्दग्राह्यमिदमपीति यदातुसहशब्दोपिसदृशवचनोस्ति सदृशःसख्यासमसखी
त्यत्रयथा तेनायमस्त्वपदविग्रहोबहुव्रीहिः समानःपक्षोऽस्येत्यादितदाप्येतदुपपद्यते अधातेत्यत्राश्रितसमासांतानित्यत्वमादायसहपित्रासपितेतिबहुव्री

भूर्भुवःस्वस्तरुस्तारःसपिताप्रपितामहः ॥ यज्ञोयज्ञपतिर्यज्वायज्ञांगोयज्ञवाहनः ॥ ११७ ॥

हिर्वाबोध्यः वोपसर्जनस्येतिसादेशः भक्तास्तुकृष्णस्तुभगवान्स्वयमित्यादिशास्त्रेषुप्रसिद्धत्वात्सः नानावतारान्प्रणीयदेवादीन्पातीतिपितेतिनामद्वयमाहुः
तत्रनामत्वात्सर्वनामकार्यंकथमितिचिंत्यं ममतुमतेनतन्नामकिंतुपितुर्विशेषणंविशिष्टंतुनामेतिनकिंचिद्बाधकमितिकृतबुद्धयोविदांकुर्वंतु पितामहस्या
पिपिताप्रपितामहः इज्यतेपूज्यतेपुनर्यज्ञः यज्ञार्थात्कर्मणोऽन्यत्रलोकोयंकर्मबंधनइत्यत्रेवकर्मणियजयाचेतिनङ् योब्रह्माज्ञोयस्माद्यज्ञोवा योयमेमा
तरिश्वेष्ठेयोधातरिचकीर्त्तितइत्येकाक्षरकोशः योवैवेदांश्वप्रहिणोतितस्माइतिश्रुतेः यज्ञानांपतिःपालयितायज्ञपतिः इष्टवान्यज्वा यज्ञःपूजनमंगमुपायोत्र
यज्ञांगः प्रतीकोपाययोरंगमितिकोशः यज्ञःपूजनमेववाहनंप्रापकमस्मिन्यज्ञवाहनः अभावेसर्ववस्तूनामुदकेनापिपूजितः योददातिस्वकंधामसत्वया ॥३२॥
किंनपूज्यतइतिपुराणे फलहेतुभूतान्यज्ञान्वाहयतीतिभाष्ये ॥ ११७ ॥

यज्ञभृदिति यज्ञंबिभर्त्तियज्ञभृत्सृष्ट्यादौ यज्ञंकंततियज्ञकृत्कल्पांते यज्ञोनामरुचेर्यज्ञोभ्यजायतेत्युक्तोवतारःसोस्यास्तियज्ञी यज्ञेभुंक्तेतत्तद्देवतारूपेण यज्ञभुक् यज्ञंयुधिष्ठिरस्यराजसूयंसाधयतिनानोपायैर्यज्ञसाधनः यज्ञानामंतंक्षयंकरोतिस्वरूपसाक्षात्कारेणयज्ञांतकृत् क्षीयंतेचास्यकर्माणितस्मिन्दृष्टे परावरइतिश्रुतेः यज्ञेषुगुह्यंफलत्वेनकैश्चिदेवज्ञायतेयज्ञगुह्यं प्रातिस्विकविधिभिस्तत्तत्फलजनकत्वबोधनेपिविविदिषावाक्येचसर्वकर्मणांविविदिषायां वेदनेवाविनियोगेनब्रह्मण्येवफलत्वपर्यवसानात् अद्यतेत्तिचभूतानितस्मादन्नंतदुच्यतइत्यन्नपदनिर्वचनं भोग्यात्मकत्वादन्नं अन्नमत्त्यन्नादोभोक्ता एवशब्दोन्नादरूपमेवजगदितिदर्शयितुंप्रयुज्यते चशब्दउक्तवक्ष्यमाणनाम्नांपरस्मिन्नेकस्मिन्समुच्चित्यद्वत्तिरितिदर्शयितुमितिभाष्यकृतः ॥ ११८ ॥

यज्ञभृद्यज्ञकृद्यज्ञीयज्ञभुग्यज्ञसाधनः॥ यज्ञांतकृद्यज्ञगुह्यमन्नमन्नादएवच ॥ ११८ ॥

आत्मयोनिःस्वयंजातोवैखानःसामगायनः॥ देवकीनंदनःस्रष्टाक्षितीशःपापनाशनः॥ ११९॥

आत्मेति आत्मैवयोनिरुपादानकारणंनान्यदित्यात्मयोनिः निमित्तकारणमपिसएवेतिदर्शयितुंस्वयंजातइति प्रकृतिश्चप्रतिज्ञादृष्टांतानुपरोधादित्यत्र स्थापितमुभयकारणत्वंहरेरितिभाष्ये अत्रस्वकर्तृत्वविशिष्टःसन्जातइत्यर्थान्निमित्तकारणतोक्ताभवति तदात्मानंस्वयमकुरुतेतिश्रुतिरूपप्रमाणसूचना यनाम्नोरात्मस्वयंपदे पराक्रांतंचात्रसूरिभिः खननंखानःविशिष्टःसोस्यविखानः सएववैखानः धरणींखात्वापातालवासिनंहिरण्याक्षंवाराहंरूपमा स्थायजघानेतिपुराणप्रसिद्धं सामगायतिवेदानांसामवेदोस्मिइत्यादिनासामगायनः देवकीनंदनःस्पष्टः सर्वेदेवादेवकीपुत्राएवेतिमहाभारते एवमपिस्रष्टा तत्तत्कार्याणां सृजविसर्गेइतिपाठात् यदैवपूर्वेज्वलनेशरीरंसादक्षरोषात्सुदतीससर्जैत्यादिषुकेवलस्यापिविसर्जनार्थत्वदर्शनात् स्रष्टाविस्रष्टावादेवकी

नंदनशरीरस्यापि कंटकंकंटकेनेवद्वयंचापीशितुःसममितिदशमोक्तेः क्षितेरीशःक्षितीशोदशरथात्मजइतिभाष्ये कीर्त्तितःपूजितोध्यातःपापानिनाशयति पापनाशनः ॥ ११९ ॥ शंखेति शंखभृन्नंदकीचक्रीशार्ङ्गधन्वागदाधरः रथांगपाणिश्चस्पष्टः शंखोलक्ष्मीपतेःपांचजन्यश्चक्रंसुदर्शनं कौमोदकीगदा खड्गोनंदकःकौस्तुभोमणिरित्यमरः रथांगंचक्रंपुनःपाणावेवास्यरथांगपाणिः अतएवकदापिशत्रुभिर्नक्षोभ्यःअक्षोभ्यः सर्वाण्येवप्रहरणान्यायुधान्यस्यसर्वप्रहरणायुधः आयुधत्वेनाप्रसिद्धान्यपिकरजचपेटादीन्यस्यायुधानिभवंति सत्यसंकल्पत्वादितिमहदैश्वर्यंदर्शयितुमिदमंतेनामोक्तं रजकस्यकराग्रेणशिरःकायादपाहरदितिमथुराप्रवेशेरजकवधे अविदूरइवाभ्येत्यशिरस्तस्यदुरात्मनः जहारमुष्टिनैवांगसहचूडामणिविभुरितिशंखचूडवधे द्विर्वचनं

शंखभृन्नंदकीचक्रीशार्ङ्गधन्वागदाधरः॥रथांगपाणिरक्षोभ्यःसर्वप्रहरणायुधः॥सर्वप्रहरणायुधओंनमइति॥१२०॥

समाप्तिंद्योतयति ओंकारोमंगलार्थः ओंकारश्चाथशब्दश्चद्वावेतौब्रह्मणःपुरा कंठंभित्वाविनिर्यातौतस्मान्मांगलिकावुभावितिवचनात् अंतेनमइत्युक्त्याभूयिष्ठांतेनमउक्तिंविधेमेतिश्रुत्युक्तंपरिचरणंकृतवानितिभाष्ये ममतुप्रतिभाति ओंनमइत्युक्तिः प्रणवादिनमोंतस्तुनाममंत्रःप्रकीर्त्तितइत्युक्तांप्रणवादिनमोंततांओंनमइत्यंततांओंनमइत्यादितांओंकारमात्रादितांनमोमात्रांततांवानामकीर्त्तनादौबोधयतीति अतएवशिवायोंनमइतिवाओंनमःशिवायेतिवाओंअच्युतानंतगोविंदेतिवाविष्णवेनमइतिवानामसंकीर्तयंतिशिष्टाः यस्यस्मृत्याचनामोक्त्या० स्मरणादेवतद्विष्णोरित्यादिप्रमाणानुसाराच्चकदाचिद्विष्णुर्विष्णुरितिगोविंदनारायणेतिवासंकीर्त्तयंति किंच ओंनमइत्यंतेपाठात्सर्वेषुनामस्वेतत्संबंधोभिप्रेतस्तेनसहस्रैर्नामभिःसहस्रपत्रपूजादौओंविश्वायेत्यादिरूपतासर्वेषुलभ्यतइतिसर्वंशिवं ॥ १२० ॥ इतिनाम्नांदशमंशतं ॥ १००० ॥

इतीदमिति दिव्यानामित्यनेनप्रकारांतरेणापिनाम्नांसहस्रमस्तिअस्यतुस्तवस्यकोपिविशेषइत्युच्यते ॥ १२१ ॥ यइदमिति परिकीर्त्तयेदित्यस्यउच्चोपांशुमानसान्यतमजपपरत्वंलक्षणयाकिंजपन्मुच्यतेजंतुरित्युपक्रमानुसारादितिभाष्ये अमुत्रेत्यनेनपरलोकंप्राप्तस्यापिययातिनहुषादेरिवानिष्टंनभवतीत्युच्यते ॥ १२२ ॥ अनिष्टाप्राप्तिफलमुक्त्वाइष्टप्राप्तिमप्याह वेदांतेत्यादिना किंजपन्मुच्यतेजंतुर्जन्मसंसारबंधनादित्युक्तंतदेतद्विरुद्धमिव यदाचर्मवदाकाशंवेष्टयिष्यंतिमानवाः तदादेवमविज्ञायदुःखस्यांतोभविष्यतिइत्यादिश्रुत्याअज्ञानमूलकःसंसारोज्ञानेननिवर्त्ततेइतियुक्त्याचमुक्तेर्ज्ञानसाध्यत्वा

इतीदंकीर्त्तनीयस्यकेशवस्यमहात्मनः ॥ नाम्नांसहस्रंदिव्यानामशेषेणप्रकीर्त्तितं ॥ १२१ ॥
यइदंश्रृणुयान्नित्यंयश्चापिपरिकीर्त्तयेत् ॥ नाशुभंप्राप्नुयात्किंचित्सोमुत्रेहचमानवः ॥ १२२ ॥
वेदांतगोब्राह्मणःस्यात्क्षत्रियोविजयीभवेत् ॥ वैश्योधनसमृद्धःस्याच्छूद्रःसुखमवाप्नुयात् ॥ १२३ ॥

वगमादित्याशंक्यनास्माभिर्जपात्साक्षादेवमुक्तिरित्युच्यतेकिंतुचित्तशुद्ध्यादिद्वारेणेत्याह वेदांतगोब्राह्मणःस्यादिति यःशूद्रःश्रृणुयादितिव्यवहितमेवसंबध्यते नतुकीर्तयेदित्यव्यवहितमपि तस्माच्छूद्रोयज्ञेनवक्लृप्तइतिश्रुतेः कीर्त्तनस्यजपयज्ञरूपतयाव्याख्यानात् श्रावयेच्चतुरोवर्णान्कृत्वाब्राह्मणमग्रतः इत्यस्यचत्वारोपिवर्णामहाभारतंश्रृणुयुरित्यर्थपरत्वेनशूद्रस्यश्रवणमात्रस्याभ्यनुज्ञानाच्च सुगतिमियाच्छ्रवणाच्चशूद्रयोनिः श्रृण्वंश्चशूद्रोपिमहत्त्वमीयादितिहरिवंशेरामायणेचश्रवणेनैवशूद्रस्यफलप्रतीतेश्च एवमेवभाष्यकृतः शिष्टाश्चैवमेवाहुः इदानींक्वचित्क्वचिद्दृश्यमानंस्त्रीशूद्राणांपौराणस्तवपठनंतुदुराचारएवेत्यलं ॥ १२३ ॥

नैतावदेवकिंतुधर्मार्थीति धर्मार्थीपापनाशकधर्मकामोधर्मंप्राप्नुयात् एतत्सर्वपठनेनैवकृततत्प्रायश्चित्तोभवेत् यद्वाधर्मार्थीविनैवदानादिकंतत्तत्फल कामोधर्मंप्राप्नुयात् विनैवदानादिकंतत्तत्फलभाग्भवेत् अर्थद्वयेऽपिसाधकवचनानिसंतितत्रतत्रनिखिलानि अर्थंगृहक्षेत्रादिरूपमर्थ्यमानं कामीस्त्री सुखार्थी ॥ १२४ ॥ कीदृशोधिकारीत्याह भक्तिमानिति भक्तिःईश्वरेपरानुरक्तिः शुचित्वंप्रायत्यं तद्गतमानसत्वंवासुदेवगतांतःकरणत्वंवानामगतांतः

धर्मार्थीप्राप्नुयाद्धर्ममर्थार्थीचार्थमाप्नुयात् ॥ कामानवाप्नुयात्कामीप्रजार्थीचाप्नुयात्प्रजां ॥ २४ ॥ भक्तिमान्यः सदोत्थायशुचिस्तद्गतमानसः ॥ सहस्रंवासुदेवस्यनाम्नामेतत्प्रकीर्त्तयेत् ॥ १२५ ॥ यशःप्राप्नोतिविपुलंज्ञातिप्राधान्यमेवच ॥ अचलांश्रियमाप्नोतिश्रेयःप्राप्नोत्यनुत्तमं ॥ २६ ॥ नभयंक्वचिदाप्नोतिवीर्यंतेजश्चविंदति ॥ भवत्यरोगोद्युतिमान्बलरूपगुणान्वितः ॥ २७ ॥ रोगार्तोमुच्यतेरोगाद्बद्धोमुच्येतबंधनात् ॥ भयान्मुच्येतभीतस्तुमुच्येतापन्नआपदः ॥ २८ ॥ दुर्गाण्यतितरत्याशुपुरुषःपुरुषोत्तमं ॥ स्तुवन्नामसहस्रेणनित्यंभक्तिसमन्वितः ॥ १२९ ॥

करणत्वंवा तच्चार्थानुसंधानरूपं ॥ २५ ॥ अर्थ्यमानंकिंचित्कथयति यशइत्यादि ॥ २६ ॥ २७ ॥ २८ ॥ दुर्गतितरणस्याप्येतत्फलत्वमाह दुर्गाणीति स्थितःप्रियहितेनित्यंयएषपुरुषर्षभ राजंस्तवयदुश्रेष्ठोवैकुंठःपुरुषोत्तमः यएनंसंश्रयंतीहभक्त्यानारायणंहरिं तेतरंतीहदुर्गाणिनात्रकार्याविचारणेतिराजधर्मेपुभीष्मवचनं ॥ १२९ ॥ वासुदेवेति वासुदेवआश्रयःशरणमस्य वासुदेवएवपरायणंप्राप्यमपियस्य श्रीवासुदेवैकशरणोहंवासुदेवमेवप्राप्स्या

मीत्यभिसंधिमानितियावत् ॥ १२० ॥ १२१ ॥ १२२ ॥ नक्रोधेति नक्रोधइत्यनेनश्लोकेनभक्तलक्षणमुच्यते पुरुषोत्तमेभक्तानांक्रोधादयोनभवं ति भैंक्तिरेवतुकथंभवेदित्येतदुक्तंकृतपुण्यानामिति ॥ १२३ ॥ द्यौरित्यादिश्लोकत्रयेणमहामहिमभगवदाश्रयणेयुक्तान्येवोक्तफलानीत्युच्यते ॥

वासुदेवाश्रयोमर्त्योवासुदेवपरायणः॥ सर्वपापविशुद्धात्मायातिब्रह्मसनातनं ॥ २३० ॥ नवासुदेवभक्ताना मशुभंविद्यतेक्वचित्॥ जन्ममृत्युजराव्याधिभयंनैवोपजायते॥ १३१ ॥ इमंस्तवमधीयानःश्रद्धाभक्तिसमन्वि तः॥ युज्येतात्मसुखक्षांतिश्रीधृतिस्मृतिकीर्त्तिभिः॥ १३२॥ नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः॥ भवंति कृतपुण्यानांभक्तानांपुरुषोत्तमे॥ १३३॥ द्यौःसचंद्रार्कनक्षत्राखंदिशोभूर्महोदधिः॥ वासुदेवस्यवीर्येणविधृता निमहात्मनः॥ १३४॥ ससुरासुरगंधर्वंसयक्षोरगराक्षसं॥ जगद्वशेऽवर्त्ततेदंकृष्णस्यसचराचरं॥ १३५॥ इंद्रि याणिमनोबुद्धिःसत्वंतेजोबलंधृतिः॥ वासुदेवात्मकान्याहुःक्षेत्रंक्षेत्रज्ञएवच॥ १३६ ॥

॥ १३४ ॥ जगद्वशेवर्त्ततेदमितिपाठः वर्त्ततइदमितिवक्तव्येसंधिरार्षः यद्वापूर्वमपिवशेऽवर्त्ततेत्यर्थः वर्त्ततीदमितिकेचित्पठंति तत्रपरस्मैपदमार्षं वर्त्त तेदइतितुपाठोनादरणीयः आधुनिकोत्प्रेक्षितत्वात् ॥ १३५ ॥ वासुदेवएवात्मास्वरूपमेषां अधिष्ठानेनैवकल्पितस्यरूपवत्त्वात् ॥ १३६ ॥

* भाष्येतुनक्रोधोनलोभोनाशुभेतिञकारानुबंधरहितेननकारेणसमस्तंपदत्रयं अक्रोधादयोभवंतीतिमात्सर्यंचनभवतीत्युक्तं

सर्वागमानामितिश्लोकेनप्रकरणाद्भिन्नेनसर्वधर्मेष्वाचारवतएवाधिकारइतिबोध्यते सर्वागमानांतत्प्रमितानांधर्माणामाचारःशौचस्नानसंध्यावंदनादिरू
पःप्रथमंअधिकारिविशेषणत्वेनपूर्वमेवविद्यमानःसन्परिकल्पते तेषांकृततासंपादनसमर्थोभवतीत्यर्थः अनधिकारिणाकृतमकृतमितिन्यायात् शुचिःकर्मा
॥३५॥ णिकुर्वीतदैवंपित्र्यमथापिवा संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु विशिखोव्युपवीतश्चयत्करोतिनतत्कृतमित्यादिविशिष्यवचनेभ्यश्च अतश्चआचा
रप्रभवोहेतुरस्यतादृशोधर्मः धर्मत्वेह्यधिकारिविशेषणंप्रयोजकं अन्यथाशूद्रकृतयज्ञादेरपिधर्मतापत्तेः तादृशस्यैवधर्मस्यअच्युतःप्रभुःफलदाता नाधि
कारिविशेषणरहितस्येति तस्मात्सहस्रनामस्तवजपार्थमपिशुचित्वादिविशेषणवतैवभवितव्यमित्यभिप्रायः अशुचिर्वेतितुमुक्तकनामकीर्त्तनेबोध्यं॥३७॥

सर्वागमानामाचारःप्रथमंपरिकल्पते॥आचारप्रभवोधर्मोधर्मस्यप्रभुरच्युतः॥ १३७॥
ऋषयःपितरोदेवामहाभूतानिधातवः॥ जंगमाजंगमंचेदंजगन्नारायणोद्भवं॥ १३८॥
योगोज्ञानंतथासांख्यंविद्याःशिल्पादिकर्मच॥वेदाःशास्त्राणिविज्ञानमेतत्सर्वंजनार्दनात्॥१३९॥

पुनरपिभगवन्महिमानमाह ऋषयइति धातवःकांचनाद्याः किंबहुना जंगममिति ॥ ३८ ॥ अखिलवाङ्मयतात्पर्यविषयतयापिमहिमानमाह योग
इति योगोयोगशास्त्रं ज्ञानमुपासनाशास्त्रं सांख्यंप्रसिद्धं विद्याःवैशेषिकादितंत्राणि शिल्पादितद्विद्याः कर्मकर्मविद्याः वेदास्तन्मूलभूताः शास्त्राणितदर्थवि
चारकाणिजैमिन्यादिकृतानि विज्ञायतेसाक्षात्क्रियतेब्रह्मानेनेतिविज्ञानमहंब्रह्मास्मीतिमहावाक्यं एतत्सर्वंजनार्दनात्जनार्दनहेतुकंभवतीतिशेषः फल
स्यापिहेतुत्वोपरमात् ज्ञानसंबंधेनपूर्ववर्त्तित्वोपपत्तेश्च सिद्धस्यापिफलतायांतुपराक्रांतंसूरिभिः यद्वाजनार्दनमततितात्पर्येणगच्छतीतिजनार्दनात् अत ॥३९
सातत्यगमनेक्विप् सर्वेवेदायत्पदमामनंतीतिश्रुतिः वेदैश्चसर्वैरहमेववेद्यइतिगीतासु नृणामेकोगम्यस्त्वमसिपयसामर्णवइवेतिपुष्पदंतश्च ॥१३९॥

एकोविष्णुरिति विश्वात्मेत्यपिभूतात्मेत्यस्यस्थानेपठंति एवंविश्वभुगखिलभोक्ताप्यव्ययोनिर्विकारइत्येवंभूतमहिमशालित्वादेतदाराधनेकिमलभ्यमिति भावः॥ १४०॥ इदानींप्रकृतस्तवस्यश्रीवेदव्यासप्रवर्त्तितत्वेनमाहात्म्यमाह इममिति व्यासेनकीर्त्तितमित्युक्त्याअहमाराधितःपूर्वंब्रह्मणालोककर्तृणा ततोनामसहस्रंमेप्राप्तंलोकहितंपरं नारदेनततःपूर्वंप्राप्तंचपरमेष्ठिनः नारदेनततःप्रोक्तमृषीणामूर्ध्वरेतसां ऋषिभिस्तुमहाबाहोदेवलोकेप्रकाशितं मर्त्त्यलोकेमनुष्याणांव्यासेनपरिकीर्त्तितमितिस्कांदोक्तंभगवद्वचोनुसरति मेमत्तः ततःपरमेष्ठिनःसकाशान्नारदेनप्राप्तंनतुसनत्कुमारादिभिः पुरुषइत्यनेनत्रैवर्णि

एकोविष्णुर्महद्भूतंपृथग्भूतान्यनेकशः॥त्रीन्लोकान्व्याप्यभूतात्माभुंक्तेविश्वभुगव्ययः॥१४०॥इमंस्तवंभगवतोविष्णोर्व्यासेनकीर्तितं॥पठेद्यइच्छेत्पुरुषःश्रेयःप्राप्तुंसुखानिच॥१४१॥विश्वेश्वरमजंदेवंजगतःप्रभवाप्ययं भजंतियेपुष्कराक्षंनतेयांतिपराभवं॥ १४२॥ इतिश्रीम०दानधर्मेविष्णुसहस्रनामसंपूर्णं॥ ॥छ॥

कस्त्रीणामपिनात्राधिकारइत्यभिप्रैति स्त्रीशूद्रौनाधीयीतांस्त्रीशूद्राश्वसधर्माणइतिश्रुतिस्मृतिभ्यांवेदश्रवणंतुतासामनिषिद्धं श्रवणनिषेधानांशूद्रत्वपुरस्कारेणैवप्रवृत्तेः ॥ १४१ ॥ इदानीमुक्तंफलंनप्रकृतस्तवपाठस्यैवकिंतुयथाकथंचिद्भगवद्भजनमात्रस्येत्याह विश्वेश्वरमिति ॥ १४२ ॥ शरणंममगोविंदः शरणंशंकरोक्तयः शरणंभगवद्भक्ताःशरणंहरिनामच ॥ १ ॥ श्रीमत्स्वयंप्रकाशांघ्रिलब्धवेदांतिसत्पदः महादेवोकरोद्व्याख्यांविष्णुनामसहस्रगां ॥ २ ॥ खबाणमुनिभूमानेवत्सरेश्रीमुखाभिधे मार्गासिततृतीयायांनगरेताप्यलंकृते इतिश्रीमद्वेदांतिमाहादेवकृताविष्णुनामसहस्रव्याख्यासंपूर्णा ॥ छ ॥

इदंविष्णुसहस्रनामसव्याख्यानंमुंबय्याख्यराजधान्यांगणपतकृष्णाजीत्यभिधानांमुद्रायंत्रालयेमुद्रितं॥ शकाब्दाः ॥ १७८५ ॥

॥ इति सटीकविष्णुसहस्रनामसमाप्तं ॥